अथ कदाचित् सन्ततविनय नतसामन्तः, नतसन्तानपरिपालितः, अनेकधर्मगतिप्रकारसकलजनपरिपालनाद्धृतजनपोषणः, सन्नुतवृन्दारक-सन्दोहकैभवः, वीर्यक्षमाधैर्यदर्शनक्रोधोदारसत्यविष्णुभूमिहिमाचल सोमानलधनदधर्मसम्मितः चतुर्वर्गफलानिष्ठागतिसम्पन्नः, चतुष्षष्ठिलक्ष्मीकलासम्पर्कक्षोडामूर्तिकलाकृतिसम्पन्नः, श्रीरघुकुल-रामस्सीतामनोरञ्जनरामः, एकस्मिन् शुभवेलायां पार्श्वगतभरत-शत्रुघ्नलक्ष्मणलक्षितः, चतुरर्णवमध्यगतावनीपालसहितः, सुग्रीवादि-वानरराजमुकुलीकरसमूहः, बन्धुजनामात्यभृत्यपुरोहितवर्गाश्रितस्सन् ऋग्यजुस्सामाथर्वणवेदवेदान्तवैशेषिकभाट्टप्रभाकरन्यायमीमांसाव्याकरण-वेदान्तवित् पार्श्वसेवासम्पन्नः, कालत्रयप्रमाणनिवेदितविनुतः भरतवीणावेणुमृदङ्ग काहलदन्तिचतुर्विधवाद्यघोषसम्पन्नः नृत्तविद्याजननी पीडीतः(निबिडितः?) आशुगचित्रमधुरवाक्यकविताजनविभूतः, सकलदिगानन्दव्यजनचामरचरितशुभचरितनारीजनकरकलितकङ्कण. रवध्वनितानन्दनिर्भरितस्सन् विविधगुणस्थानसभायां कनकमय-सिंहासने पद्मासननिष्ठादद्भुतपूर्वाभिमुखस्सन् सकलजनानुग्रहाय-सन्दर्शनमादधानः साक्षात्कृतः अक्षिभ्यां चारयामास ।

अथाययुर्महात्मानो मुनयो ब्रह्मवादिनः ।
नारदोत्रिर्वसिष्ठश्च भृगुर्भवनकौशिकौ ॥ 1

घटजातो गालवश्च पाराशर्यश्च शौनकः ।
एवमादि महात्मानो रामदर्शनकाङ्क्षिणः ॥ 2

द्वारमागत्य विविशुः प्राप्तोऽस्मीति निवेदयन् ।
रामो विदितवृत्तान्तः आनयामास तान् ऋषीन् ॥ 3

अर्घ्यपाद्यादिकान् दत्वा आसनानि पृथक् पृथक् ।
आश्रमेष्वग्निशिष्येषु मृगपक्षिजनेष्वपि ॥ 4

तपो निर्विघ्नकार्येषु कुशलं परिपृष्ठवान् ।
अथ सर्वे ऋषिगणा ऊचुः परमहर्षिताः ॥ 5

श्रीमान्भक्तपराधीनस्सर्वभूतदयापरः ।
त्वं जगत्कारणीभूते सर्वेषां नस्सुखागमः ॥ 6

कालत्रयेषु सर्वेषां योगक्षेमाय सम्भृतः ।
त्वं जागृतिर्महान्तो हि कुशलं सर्व एव नः ॥ 7

त्वं ब्रह्म परमं धाम हरिर्नारायणो विभुः ।
त्वं धाता च विधाता च त्वमोङ्कारः प्रजापतिः ॥ 8

अनन्तनाम त्वामेव वदन्ति ब्रह्मवादिनः ।
अवतारसहस्राणि लीलया च करिष्यसि ॥ 9

मत्स्यकूर्मवराहश्च नारसिंहश्च वामनः ।
रामो भूत्वा महीं सर्वां काश्यपाय महात्मने ॥ 10

दत्वेदानीन्नरो भूत्वा राघवाणां कुले भवान् ।
देवकार्यनिमित्तं च प्रार्थिते देवयोगिभिः ॥ 11

---

* Extra notes in the MSS. पूजा

आगमं पुरुषव्याघ्रो भवान् रावणमर्दने ।
अवतीर्णोऽस्मि भूम्यां तु राक्षसानां निबर्हणे ॥ 12

कौशिकस्य मखार्थाय सुबाहुविदलीकृतः ।
मारीचं च समुद्रे तु सम्पूर्णे शतयोजने ॥ 13

पातयित्वा महत्कर्म ताटकामपि दारयन् ।
शापादहल्याान्निर्मुच्य गौतचमस्य ददासिताम् ॥ 14

हरकोदण्डमतुलं भग्नं कृत्वातिलीलया ।
सीतां प्राप्य भवान् रामं जित्वायोध्यामहापुरीम् ॥ 15

गत्वा साम्राज्य विषये अभिषेकाय चोद्यतः ।
तस्मिन्काले महत्कर्म करणीयमितीच्छया ॥ 16

पितुर्वचनरूपेण प्राप्तवान् दण्डकान् प्रति ।
विराधमोक्षं कृत्वा तु मारीचं कृत्तवानसि ॥ 17

सीतावियोगात्सुग्रीवमभिषिच्य तदाग्रजम् ।
हत्वा वानरसैन्यानां नाथं तं कृतवानसि ॥ 18

सागरं शरवेगेन शोषयित्वा च कोपतः ।
सेतुं बध्वा समुद्रे तु प्राप्य लङ्कां त्रिकूटके ॥ 19

वानरैरोधनं कृत्वा ससुग्रीवसहायवान् ।
रावणं कुम्भकर्णं च अन्यान् राक्षसपुङ्गवान् ॥ 20

हत्वा पुष्पकभारुह्य देवैरपि दुरासदम् ।
त्वया प्राप्तं महत्कर्म ब्रह्मादिनामशक्यकम् ॥ 21

एतत्कार्यं महाबाहो अशक्यं शम्भुनापि वा ।
लङ्कां बाधयितुं को वा त्वदन्यपुरुषादृते ॥ 22

दुष्कृतं देवगन्धर्वैस्सिद्धयक्षैर्महाबलैः ।
जितवांस्त्वं कथं रक्षो हन्तासि बलिनां वरम् ॥ 23

आश्चर्यमेव भवन्ति स्म आवां कर्मकृतं त्वया ।
मनसापि न शक्योऽयं रावणो लोकरावणः ॥ 24

मेघनादो महामायी कुम्भकर्णोतिदुष्टवान् ।
तान्कथं शकलीकृत्वा बाणैस्सन्ताप्य राक्षसान् ॥ 25

दिष्ट्या भवान् समर्थोऽपि सर्वराक्षसमर्दन ।
त्वत्समो नास्ति लोकेषु देवानां मानुषे किमु ॥ 26

इति स्तुत्वा महात्मानं रामं ऋषिगणांस्तदा ।
आयुषं च प्रयुञ्जाना आसनेषु सुखास्थिताः ॥ 27

रामोऽपि तेषां वचनं निशम्य
हृदम्बुजे शोभितहर्षकन्दः ।
स्मृत्वा च तान् सम्भ्रममादरेण
बद्धाञ्जलिः प्राह महानुभावान् ॥ 28

इति जैमिनीभारते मारुतिमैरावणचरित्रे
द्वितीयोऽध्यायः

तृतीयोऽध्यायः

सूतः –

मुनीनां वचनं श्रुत्वा रामो बलपराक्रमः ।
स्तोत्रमार्गेण सन्तुष्टः आच च स तान् ऋषीन् ॥ 1

श्रूयतां मुनयस्सर्वे वेदवेदाङ्गपारगाः ।
अयं हनूमन्विक्रान्तः राक्षसानां विनाशने ॥ 2

मम कार्य पुरोगामी स्वामिकार्यधुरन्धरः ।
येन जेतास्मि सङ्ग्रामे रावणप्रमुखानरीन् ॥ 3

हनूमता वेगवता सीतां तां प्राप्तवानहम् ।
एतादृशस्स हनूमान् यस्य मन्त्री भविष्यति ॥ 4

तस्य कार्यस्य साहस्रं साधकं भवति ध्रुवम् ।
वायुसूनुसमो नास्ति विक्रमे बुद्धिलाघवे ॥ 5

प्लावने गमने चैव गर्जने तोलनेऽपि वा ।
उपोद्धाते च उत्क्रान्ते त्रोटने घट्टनेऽपि वा ॥ 6

यातायाते महोद्धारे आगन्तुकविलोलने ।
अप्सु चाकाशसञ्चारे धारणे पोषणेऽपि च ॥ 7

घटने घर्षणे चैव वचसां परिभाषणे ।
भ्रमणे गर्जने चैव कृत्याकृत्यविचिन्तने ॥ 8

हसने दोलने तन्त्रे पूर्णमान विचक्षणे ।
उत्खण्डीने प्रलीने च धून्वने कम्पने समे ॥ 9

घोषणे हुंकृते बभ्रेषट्त्रिंशद्गतिमार्गके ।
देवमानुषरक्षांसि न कुतश्चिल्लभतेपुमान् ॥ 10

ईदृशोऽयं महाप्राज्ञः मम किं नाम दुर्लभम् ।
वायुसूनोश्च चरितं वक्तुं नालं चतुर्मुखः ॥ 11

सीता लब्धा हनुमता लक्ष्मणो वानरैस्सह ।
शतयोजन विस्तीर्णस्समुद्रो येन लङ्घितः ॥ 12

सीतां दृष्ट्वा वनं नष्टं सप्तमन्त्रि सुता अपि ।
पञ्चसेनाग्रगानष्ट अक्षोपि विनिपातितः ॥ 13

येन लङ्कापुरी दग्धा ब्रह्मास्त्रं शकलीकृतम् ।
राक्षसानामहोग्राणां आश्रितं त्वयमक्षयम् ॥ 14

याममात्रेण चानीते तेन चौषधपर्वतः ।
एवमादि महत्कर्म कृतवानन्यदुष्करम् ॥ 15

अञ्जनासूनुना सार्धं विजितोहं रणाजिरे ।
रामस्य वचनं श्रुत्वा ऋषिमध्ये महातपाः ॥ 16

अगस्त्यो राममासाद्य उवाच वदतां वरः ।

अगस्त्यः –

रामचन्द्रमहाबाहो मारुतिं प्रति भाषितम् ॥ 17

यत्तत्कृतं भूतपूर्वं प्रत्यक्षेण निदर्शितः ।
पराक्रमं विनिर्दिष्टुं तद्युक्तं भवताधुना ॥ 18

रहस्यं रात्रिकृत्यं च न जानीषे भवान्विना ।
बहिरन्तर्गतं कार्यं दिव्यदृष्ट्या तु भावितम् ॥ 19

सीताया मार्गणं चैव राक्षसानां च मार्गणम् ।
वनभङ्गं पुरं ध्वस्तं लङ्कादहनमेव च ॥ 20

पुनरावर्तनं चैव मणिदानं ततः परम् ।
सेतुबन्धनसाहाय्यं राक्षसानां विनाशनम् ॥ 21

हनूमता कृतं ह्येतदित्युक्तं भवता किल ।
ज्ञानदृष्ट्यास्त्वहं ज्ञाने कृतं कार्यं हनूमता ॥ 22

रहस्यं विधिना साध्यं यत्तत्कार्यं ब्रवीम्यहम् ।
श्रुणुष्वापहितो राजन् चरितं महदद्भुतम् ॥ 23

प्रहस्तं कुम्भकर्णं च अतिकायं महाबलम् ।
मेघनादं वज्रदंष्ट्रं अन्यान्मदबलोद्धतान् ॥ 24

हत्वा भवाश्चतुर्दश्यामर्वाग्रात्रिसुखागते ।
सर्वमूलबलं हत्वा चतुर्दश्यां महास्त्रतः ॥ 25

दशाननैकशेषं स्यात् कृत्वा सायं चतुर्दशी ।
अमायां रावणं हत्वा गमिष्यामि यथासुखम् ॥ 26

इति निश्चित्य मनसा संस्था किल रणाजिरे ।
सुलभं रावणं हत्वा मतिं कृत्वा भवान् तदा ॥ 27

लक्ष्मणेन सहभ्रात्रा एकस्थाने सुखावहम् ।
निद्रावधिसमाक्रान्तौ सुष्वाप तु च सङ्गरे ॥ 28

शाखास्तरणशय्यायां निद्रया निभृतं कृते ।
ऋक्षवानरकोटीनां युवां मध्ये नरर्षभौ ॥ 29

अतिमुदितमनामहानुभावा-
विबुधगणाहितकार्यसाधनेषु ।
स्वगतजनयशोभिवृद्धिहेतो-
रनुजसहाय सुषुप्तिमाजगाम ॥ 30

इति जैमिनीभारते मारुतिमैरावणचरित्रे
तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः

श्रीसूतः –

रावणोऽपि महातेजा रामबाणप्रपीडितः ।
विनिश्वस्य विनिश्वस्य व्रीलितो नम्रवक्त्रकः ॥ 1

राक्षसीनां प्रलापं च नारीणां हतभर्तृतः ।
अन्तः पुरं प्रविश्याथ स्वस्त्रीणां निकटे तदा ॥ 2

रामप्रभावविज्ञानं लक्ष्मणस्य महात्मनः ।
अक्षयं वानराणां च उक्त्वा विकृतमानसः ॥ 3

अमायां त्वां हनिष्यामीत्युक्तं रामेण निश्चितम् ।
इतःपरं किं करोमि किं वा जनमहं भजे ॥ 4

त्रयाणामपि लोकानां कण्टकोयं हि निश्चयः ।
कुत्रापि नास्ति मां त्राता रामस्याभिविरोधिनम् ॥ 5

सर्वं राममयं पश्ये किमुपायं करोम्यहम् ।
इति चिन्ताकुलो रक्षः रामबाणमनुस्मरन् ॥ 6

पातालल‍ङ्काधिपतिं स्नेहसम्बन्धिनं बलिम् ।
संस्मार ! राक्षसं घोरं मैरावण ! मम स्तव ! ॥ 7

रावणस्मरणात्सोऽपि मैरावणमहाबली ।
आजगाम मुहूर्तेन दशास्यं रावणं तदा ॥ 8

तं दृष्ट्वा सहसोत्थाय आसने सन्निवेश्य च ।
दिव्याभरणवस्त्राद्यैः दिव्यगन्धानुलेपनैः ॥ 9

अर्चयामास सुप्रीतो दशग्रीवः प्रतापवान् ।
स्वागतं ते महाबाहो सुखमास्व निशाचर ॥ 10

त्वत्समानोऽस्ति लोकेषु मायाबलपराक्रमे ।
तपसा च वरं लब्ध्वा ब्रह्मणशिवोगिनः ॥ 11

आपद्बन्धुरिहप्राप्तस्त्वमसि ब्रह्मकण्टकः ।
इत्युक्तो रावणेनाथ ऐरावतमदापहः ॥ 12

मैरावणोथ तं प्राह कुशलं बलकोशयोः ।
सपुत्रदारामात्येषु मित्रेषु च परं तप ॥ 13

आपद्बन्धुरिति प्रोक्तस्त्वया समरभीरुण ।
किमर्थं मां स्मरसि भयं किं वा वदस्व मे ॥ 14

लोकानां रावणो भूत्वा इदानीं किमु रावण ।
इन्द्रादयो लोकपालास्सदाज्ञा हृदि धारयन् ॥ 15

सञ्चरन्तस्सुवर्लोके धनदोप्यलकापुरे ।
कैलासं कन्तुवत्कृत्वा धर्मराजं विजित्य भो ॥ 16

एतादृशबलिष्ठस्य किमर्थं भयमागतम् ।
देवदानवगन्धर्वै सयक्षोरगराक्षसैः ॥ 17

अवध्यं त्वं त्वयाप्राप्तमिदानीं किं विलप्यते ।
भयमाचक्ष्व देवारे कस्मात्प्राप्ता मनोव्यथा ॥ 18

महेन्द्रजित्कुम्भकर्णो नास्ति वा भवदन्तिके ।
अतिकायप्रहस्तौ तौ गम्यते कुत्र बान्धवौ ॥ 19

एतैस्सहदशग्रीव जितवान्वज्रिणं पुरा ।
कुतस्त्वं कश्मलो भूत्वा वक्तुं नार्हसि रावण ॥ 20

कथयस्व महाबाहो भयकारणमुद्भवम् ।
एवमुक्तो दशग्रीवः प्रत्युवाच च रावणम् ॥ 21

श्रोतव्यं राक्षसव्याघ्रमयाकृतमनर्थकम् ।
रामो दाशरथादेशात् सीतया लक्ष्मणेन च ॥ 22

पितुः प्रतिज्ञां कुर्वाणो दण्डकान् प्रविवेशह ।
कृत्वा श्रमं पञ्चवट्यां विचचारानुजेन च ॥ 23

ममानुजा शूर्पणखी रामं दृष्ट्वातिसुन्दरम् ।
कामयामास चापल्यात् स्त्रीधर्माच्च विशेषतः ॥ 24

प्रार्थयन्तीं सीतां दृष्ट्वा रामो बलपराक्रमः ।
कोपाभिभूतस्तन्नासां चिच्छेद च जहास च ॥ 25

मम भ्राता खरो नाम त्रिशीर्ष्णादूषणेन च ।
विरूपितां शूर्पणखीं रामं दृष्ट्वा सहानुजम् ॥ 26

निगृहीतुं गते काले रामेणासन् क्षयङ्गताः ।
चतुर्दश सहस्राख्यान् जनस्थाननिवासिनः ॥ 27

खरं त्रिशिरसं चैव दूषणं च महाबलम् ।
तेषामनुचरांश्चैव यामार्धेन निजघ्निवान् ॥ 28

अकम्पनश्च तच्छुत्वा दृष्ट्वा शूर्पणखीं तदा ।
तस्य प्रतिक्रियार्थाय मारीचसहितोऽस्म्यहम् ॥ 29

रामाश्रमं प्रविश्याथ मायोबलपराक्रमः ।
वञ्चयित्वाथ तौ वीरौ सीतामादाय सत्वरम् ॥ 30

लङ्कायां संप्रविष्टोऽस्मि हृष्यमाणेन चेतसा ।
सरामो मायिनं हत्वा मार्गमाणो महीसुताम् ॥ 31

अनासाद्य सतां रामो सुग्रीवं च समासती ।
वालिनं च रणे हत्वा सुग्रीवनस्य बलाग्रजम् ॥ 32

राज्ये निक्षिप्य सुग्रीवं सर्ववानरपुङ्गवैः ।
समुद्रं क्षोभयित्वा तु सेतुं बध्वा सुखेन सः ॥ 33

लङ्कां रुरोध विधिना राक्षसाःप्रवराहताः ।
अहं शेषो हतास्सर्वे पुत्रानुजपुरोगमा : ॥ 34

एवं रामेण सम्प्राप्तो विजयोमम दुःखजः ।
यमक्षयं कारयित्वा सर्वान् बन्धूंश्च राक्षसः ॥ 35

लङ्कां स्थातुमशक्यं मे तेषां स्थानमहं व्रजे ।
रामं च लक्ष्मणं हत्वा प्रतिज्ञां साधयाम्यहम् ॥ 36

वानराणां वधे प्राप्ते शरीरं पातयाम्यहम् ।
बन्धहीनः क्षणमपि जीवितं नोत्सहे वद ॥ 37

एतादृशं नरं रामं तापसं राज्यलोपकम् ।
अनिर्जित्य मम श्रेयः कथं वा वद राक्षस ॥ 38

सखायं त्वादृशं प्राप्य किं रामं न सहामहे ।
तस्मिन्काले भवान् गत्वा यथाशक्यं सहायताम् ॥ 39

मायाबलविशेषत्वान्मत्तस्त्वमधिको भवान् ।
एतादृशं नरं रामं तापसं राज्यलोपकम् ॥ 40

अनिर्जित्य मम श्रेयः कथं वा वद राक्षस ।
सखायं त्वादृशं प्राप्य किं रामं न सहामहे ॥ 41

तस्मिन्काले भवान् गत्वा यथाशक्यं सहायताम् ।
मायाबलविशेषत्वान्मत्तस्त्वमधिको भवान् ॥ 42

तस्मात् गच्छस्व रामं च यथाग्राह्यं तथाकुरु ।
तौ गृहीतौ यदि तदा सर्वं साध्यं भवेद्ध्रुवम् ॥ 43

इत्युक्त्वा विरराामाथ रावणो रावणं तथा ।
मैरावणोपि तच्छ्रुत्वा नीतिं किञ्चिदुवाच ह ॥ 44

दशवदनरुषागलितं-
वचो भृशमपहाससुरारिसर्पवर्गान् ।
शमनग्रहवसाय निश्चितमनः
तदनुकृतमतिस्तदानिःश्वसन्स्यात् ॥ 45

इति जैमिनीभारते मारुतिमैरावणचरित्रे
चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः

श्रीसूतः –

रावणस्य तु तद्वाक्यं श्रुत्वा मैरावणोऽब्रवीत् ।
विधातृवरसंमोहात् कृत्याकृत्यमजानतः ॥ 1

कश्चिदात्मसमो नास्ति यदा बुद्धिस्तदान्वयम् ।
महाबलं पराक्रान्तमज्ञात्वा रामविक्रमम् ॥ 2

तस्यापराधं संयोज्य किं लज्जसि च रावण ।
लीलामानुषतां प्राप्य देवकार्यात्प्रिसिद्धये ॥ 3

राक्षसानामभावाय जातो रामो रघौ कुले ।
देवासुरैरशक्यं यत् कर्म दृष्ट्वा त्वमर्हसि ॥ 4

गतं कार्यं समुद्दिश्य इदानीं चिन्तितं वृथा ।
गते जले सेतुबन्धं कर्तुमिच्छति कःपुमान् ॥ 5

गतं तु नानुशोचामि इदानीं शृणु रावण ।
राघवं सर्वधर्मज्ञं सर्वराक्षसमर्दनम् ॥ 6

त्वत्स्वसानासहरणं गृहीष्यामि स्वमायया ।
मायाजालेन सर्वांस्तान् मोहयित्वा सलक्ष्मणम् ॥ 7

औषधैस्तमुपध्यात्वा कारयिष्ये विषोल्बणम् ।
रामं च लक्ष्मणं चैव गृहीष्यामि न संशयः ॥ 8

आपृच्छेत्वा महाराज यथाशक्तिकरोम्यहम् ।
तद्वाक्यं दशकण्ठोऽथ हेतुमत् गदितं तदा ॥ 9

सन्तुष्टहृदयस्तस्मै मालां कण्ठे हिरण्मयीम् ।
धारयित्वा शिरोवस्त्रं शातकं तु (कुम्भं?)महार्हकम् ॥ 10

अभेद्यकवचं चक्रं सर्वप्रहरणानि च ।
दत्वालिङ्ग्यं तमामन्त्र्य स्वस्थोऽभवदधार्मिकः ॥ 11

मैरावणोऽपि सम्प्राप्य स्वालयं निभृशं (तं?) तदा ।
शयनीयगृहस्थाने किञ्चिद्विश्राम्य मण्डपे ॥ 12

भार्यां मतङ्गसम्भूतां मातङ्गीं मदकारिणी ।
सर्वसौन्दर्यसंयुक्ता मानयामास चान्तिके ॥ 13

भर्तुराज्ञां कृतच्छ्रुत्वा मातङ्गी मृदुभाषिणी ।
मेघश्यामा च बिम्बोष्ठी चन्द्रबिम्बी बृहस्तनी ॥ 14

समीपं भर्तुरागत्यातिष्ठन् नम्रमुखी तदा ।
उवाच प्रीतिसंयुक्ता सुस्वरा चारुहासिनी ॥ 15

किं मां प्रेषितवान् राजन् ध्यानभूतोसि किं वद ।
आचक्ष्व सर्वकार्यं मे हृद्गतं तव पौरुषम् ॥ 16

स्वभार्याप्येवमुक्तस्सः मातङ्गीं पुनराह च ।
श्रृणु ! भद्रे ! विशालाक्षि ! हृद्गतं कार्यनिश्चितम् ॥ 17

अयोध्याधिपतिर्वीरो रामो राजीवलोचनः ।
पित्रादेशाद्वनं यातः भार्यया भ्रातृसहायवान् ॥ 18

रावणस्य स्वसा तन्तु वृषस्यन्ती विरूपिता ।
तस्यानिमित्तं घोरास्ते दण्डकारण्यवासिनः ॥ 19

खरत्रिशिरसा सार्धं रामेण विनिपातिताः ।
तौ वञ्चयित्वा पौलस्त्यो सीतामादाय सत्वरम् ॥ 20

उद्याने तां च संस्थाप्य स्वकाममनवाप्य च ।
सीतां रामो मार्गयित्वा लङ्कास्थामिति निश्चितम् ॥ 21

वानरैर्घोरसंकाशैस्सेतुं बध्वा महोदधौ ।
प्रहस्तं कुम्भकर्णं च सर्वान्सेन्द्रजितान् रणे ॥ 22

हत्वा चतुर्दशिदिने रावणं हतशेषितम् ।
मत्सखारावणस्तस्मात् मां स्मृत्वा चाभ्यभाषत ॥ 23

आपत्सहायः कर्तव्यः अवश्यं क्रियतांस्त्वाया ।
इत्यहं प्रार्थितस्तेन स सम्यगिति भामिनी ॥ 24

प्रतिश्रुतं मया देवी रामहन्तास्मि निश्चया ।
सलक्ष्मणं हनिष्यामि कुर्मो दुर्गां बलिं च तौ ॥ 25

मनसि प्रतिसञ्जातमिदं कार्यं वरानने ।
अन्तःपुरे त्वं निश्शङ्का भव पूजनिशाचरी ॥ 26

गमिष्यामि च रामं तं ज्योष्यामि च न संशयः ।
इत्युक्तवन्तं मातङ्गी रुरोदाश्रून्यमुञ्चत ॥ 27

हा हन्तेति च निश्वस्य उवाचेदं वचोऽब्रवीत् ।
केनोपदेशितं ह्येतदनर्थं सर्वरक्षसाम् ॥ 28

ऋणानुबन्धं ह्येतावद्रामदर्शनमात्रकम् ।
पातालस्थानमासाद्य निर्भयेन त्वया सह ॥ 29

चिरं स्थिरीभविष्यामि इति बुध्वा वसाम्यहम् ।
दैवेनानुष्ठितं कार्यं अन्यैर्लेप्तुं न शक्यते ॥ 30

दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ।
वैकुण्ठवल्लभस्य त्वं द्रोहं कर्तुं अनार्यकम् ॥ 31

यदन्तरं हस्ति बिलालयोर्वने
तदन्तरं दाशरथेस्तवास्ति भो
यदन्तरं सिंह श्रृगालयो वने ।
तदन्तरं दाशरथेस्तवास्ति भो ॥ 32

इति जैमिनीभारते मारुतिमैरावणचरित्रे
पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः

श्रीसूतः –

भार्यावचनमाज्ञाय रुषितो रावणोब्रवीत् ।
भार्यानिर्भत्स्य मूढात्मा कत्थसे किं वृथा हि मे ॥ 1

मम माया महावीर्यं दैवैरपि सुदारुणम् ।
वज्रिणं पातयिष्यामि यमं वा वरुणेन वा ॥ 2

पावकं शमयिष्यामि पाययिष्यामि सागरम् ।
मानुषं लक्ष्मणं राम मानयिष्यामि मत्स्थलम् ॥ 3

इत्युक्त्वा शयनं त्यज्य विनिर्गत्य पुराद्बहिः ।
घटकं च समाहूय मम मन्त्रिपुरोगमान् ॥ 4

आदाय शीघ्रं त्वं गच्छ कार्यं हि महदुद्यतम् ।
इत्युक्तो घटको रक्षस्सर्पान् सचीमुखादिकान् ॥ 5

राजा युवां वक्तुमिच्छन् मन्त्रार्थं द्रष्टुमिच्छति ।
आयास्यध्वं द्रुतं यूयमाविलम्बमना कृथाः ॥ 6

इत्युक्त्वा मन्त्रिमुख्यास्ते राजानां द्रष्टुमुद्गताः ।
सूचीमुखादयस्सर्वे ऊर्ध्वं नत्वा कृताञ्जलिः ॥ 7

किं कार्यमत्र गच्छावः ग्रहणार्थे यमस्य वा ।
गृहीष्यामोऽथ देवान् वा महेन्द्रधनदानपि ॥ 8

एवं मन्त्रिगणां वाचं निशम्येदमुवाच ह ।
श्रुणुध्वं राक्षसा यूयं रामो दशरथात्मजः ॥ 9

[?]ननं सखायं मै हन्तुं लङ्कां प्रवेश्य च ।
तेन रामेण सर्वान्ते विना रावण निर्हताः ॥ 10

दशकण्ठो कण्ठमनाः मां स्मृत्य रामसाधने ।
प्रणीतवान् हि तस्मान्मे मम कार्यार्थसाधने ॥ 11

भवथ ब्रह्मपीडास्ते सर्वप्रहरणे युताः ।
आपृच्छ्य दारान् बन्धूंश्च आगन्तव्यं मया सह ॥ 12

इत्युक्तास्ते मदोद्धर्षास्तथा चक्रतुरञ्जसा ।
मैरावणोऽपि दुष्टात्मा मायाग्रहमवाप च ॥ 13

प्रविश्य पेटिकां मायां गृहीत्वारत्नभूषिताम् ।
मोहचूर्णानि चादाय उपध्माक्रियवौषधान् ॥ 14

छिन्नदण्डं समादाय भेद्यशस्त्री करण्डकान् ।
प्रसीत्कारी शिलां गृह्य अदृश्याञ्जनमेव च ॥ 15

इन्द्रजाली क्रियां धृत्वा महाजालीमथापि च ।
दिव्यास्त्रादीनि सर्वाणि दिव्यशस्त्राणि धारयन् ॥ 16

निर्गमाय मतिं चक्रे मन्त्रिभिस्सार्धमञ्जसा ।
अभिगच्छत्सु सर्वेषु रावणस्य स्खलत्पदे ॥ 17

क्षुधा जातं च सर्वेषां प्रस्खलश्च पदात्पदम् ।
अकस्मान्नेत्र मार्गेषु अश्रूणि समजायत ॥ 18

स वामनेत्रकं पद्भ्यां तथा मुखविलोडनम् ।
मन्दस्वरविकारासु रुक्षकारा इवाभवन् ॥ 19

आकाशात्पततोल्का च गोमायुः प्ररुदन्मुहुः ।
शिवाघोरस्वनात् क्रन्दन् प्रयाणोग्रे विदर्शिताः ॥ 20

दिवान्धा हि रुता आसन् हस्तभ्रष्टास्स चायुधाः ।
एवं दुःशकुना आसन् गच्छतां पथि दुस्सहम् ॥ 21

स दुष्टभाक् कर्मचिकीर्षयन्तदा-
विभ्रष्टमाल्याभरणायुधा भृशम् ।
कुसृष्टिमाया विभवेन निर्जितं
विसृष्टबुद्धि स्सजगाह सङ्गरम् ॥ 22

इति जैमिनीभारते मारुतिमैरावणचरित्रे
षष्ठोऽध्यायः

सप्तमोऽध्यायः

श्रीसूतः –

रामे निद्राविधिं प्राप्ते वानराणां च मध्यके ।
अङ्गदो जाम्बवांश्चान्ये ससुग्रीवहनूमति ॥ 1

विभीषणे च तिष्ठत्सु आमात्यास्तस्य रक्षसः ।
विभीषणं समासाद्य कृताञ्जलिपुटाभवन् ॥ 2

रावणस्य च कृत्यं तु मैरावणचिकीर्षताम् ।
निश्चितं मन्त्रितं येन एकान्ते रावणेन सः ॥ 3

रावणस्य च दुर्बुद्धे मैरावणदुरात्मनः ।
सख्यं पूर्वसमाजं च ऊचुः प्राञ्जलयस्तदा ॥ 4

विभीषणोऽपि तच्छुत्वा भीतस्तस्य कृते मुहुः ।
दौरात्म्यात् राक्षसश्रेष्ठो मायाबलगुणाधिकान् ॥ 5

रामलक्ष्मणगुप्त्यर्थं जागर्तव्यं स वानरैः ।
इति चिन्ताकुलो भूत्वा यत्र सुग्रीवमारुती ॥ 6

तयोस्समीपमागत्य उवाच च विभीषणः ।
राजन् वानरकोटीनां हनूमन्नञ्जना सुत ॥ 7

इदमेतन्महत्कार्यं सर्वेषां भयकारणम् ।
सञ्जातं रावणाद्धोरं श्रोतव्यमनसूयया ॥ 8

तच्छुत्वा वानरं मह्यं मूलघातमनर्थकम् ।
अतः परन्तु कर्तव्यं अनुज्ञां कर्तुमर्हथ ॥ 9

इति ब्रुवाणं वचनं विभीषणमिनात्मजः ।
शीघ्रं कथय ! तत्सर्वं युक्तं बुद्धिमतां वर ॥ 10

एवमुक्तो महातेजा राक्षसोऽथ यथागतम् ।
श्रृणु ! सुग्रीववाक्यं मे हनुमन् श्रृणु ! मद्वचः ॥ 11

सर्वमूलबलं द्रव्यं सपुत्रगण बान्धवम् ।
रावणः किल शिष्टोऽयमस्मिन् सायन्तने शुभे ॥ 12

रामबाणेन निर्विण्णः ययौ प्रकिरमूर्धजौ ।
रावणः कालदुष्टात्मा गत्वा चान्तःपुरं शुभम् ॥ 13

सखायो रावणस्यासीन्मैरावण इति स्मृतः ।
देवासुरैश्च दुर्धर्षः सर्वमाया विशारदः ॥ 14

तं स्मरिष्य च सत्कृत्य रामं हन्मीति भाषितम् ।
तथा कुर्मो न सन्देहः रामं रामानुजस्तथा ॥ 15

लोके कश्चन तिष्ठेत मम माया बहिस्थितः ।
अवश्यं साधयाम्याशु सरामं लक्ष्मणं तथा ॥ 16

जीवन्नेव गृहीष्यामि तौ चोभौ रामलक्ष्मणौ ।
पाताललङ्कादुर्गायां बलिं बध्नामि तौ मुदा ॥ 17

एवमुक्त्वा विसृज्याशु रावणं रणकर्कशम् ।
निर्जगाम च लङ्कायां पातालस्थां पुरीं ययौ ॥ 18

यदा कदाचिदागच्छेत् किं करिष्यति रावणः ।
मैरावणो महामायी घटनाघटनङ्गकः ॥ 19

वानराणां मनःक्षोभं क्षणेन च करिष्यति ।
मित्रभेदं स्नेहभेदं वीर्यवाक् स्तम्भनं तथा ॥ 20

गतिस्तम्भं बलिस्तम्भं सेनास्तम्भमेव च ।
आयुधानां च संस्तम्भं जलाग्निस्तम्भनं तथा ॥ 21

सर्वेन्द्रजालिकां विद्यां वेत्ति तत्त्वविशारदः ।
मैरावणोऽगमात्पूर्वं कर्तव्यमनुचिन्त्यताम् ॥ 22

विभीषणशुभं वाक्यं श्रुत्वा सुग्रीवमारुती ।
आलोच्य विविधोपायै तत्क्षणं नाभ्यवद्यत ॥ 23

इति चिन्ताकुलास्सर्वे ससुग्रीवविभीषणः ।
हनूमन्तमथालोच्य ऊचतुः बलिनां वरम् ॥ 24

हनुमन् त्वत्समो नास्ति आपत्काले समागमे ।
रक्षितुं त्वादृतः कश्चित् त्रिषुलोकेषु वा पुनः ॥ 25

लक्ष्मणप्राणदाता त्वं वानराणां तथापि च ।
सीताशोकविनाशस्त्वं बहुराक्षस मर्दक ॥ 26

गते जले सेतुबन्धं कर्तुं कार्यमयुक्तकम् ।
त्वमेव रक्षितुं सर्वान् रामलक्ष्मणमेव च ॥ 27

अस्मिम् काले यथाशक्यं तत्कुरुष्व महामते ।
एवमुक्तस्तु हनूमान् प्रत्युवाच महामनाः ॥ 28

यत्कृते तु च या भीषा तत् त्याज्या दूरतः प्रभो ।
माया नि(नु?)ष्ठानकोयस्तु तद्भयात् भीषणं वृथा ॥ 29

क्षणे सहस्रमायी च रामं द्रष्टुमशक्यगः ।
रक्षिष्यामि च तौ देवौ वानराणां च सेनया ॥ 30

विश्वरूपाकृतिर्भूत्वा रक्षिष्यामि च सर्वशः ।
रामात्प्राप्तं विश्वरूपं स्थूलरूपं बहूंस्तथा ॥ 31

आकर्षणस्य या विद्या कलाग्राहकया च या ।
बलात् कर्षणया विद्या परीविद्यानुबन्धनम् ॥ 32

सर्वमाया बन्धनं च परस्तम्भनविप्लवम् ।
योगमायमहत्वं च रामात्प्राप्तं गणोदयम् ॥ 33

सर्वं जानामि राजेन्द्र कपिराक्षसपुङ्गव ।
पश्यन्तु सेन्द्रा देवास्ते मत्कर्माप्यतुलं भुवि ॥ 34

मम बालविधानेन प्राकारं बहुशोन्नतम् ।
चन्द्रमण्डलमौन्नत्यं पातालमनुदर्शितम् ॥ 35

वालवृद्धां करिष्यामि वप्रे सर्वगुणानपि ।
न प्रवेष्टुं देवबृन्दैः किमु राक्षसकोटिभिः ॥ 36

एवं ब्रुवाणो ववृधे वालमण्डलसंयुतः ।
ब्रह्माण्डभाण्डपर्यन्तं रसातलतलातलम् ॥ 37

वालं सम्पूर्णतां कृत्वा लक्षाक्षौहिणि वानरान् ।
मध्ये निधाय परितश्शतयोजनमण्डलम् ॥ 38

चन्द्रमण्डलपर्यन्तं वप्रं कृत्वा महा (द्भुतम् ?) ।
शुशुभे विश्वकर्मेव स्रष्टुमार्गातिरिच्य च ॥ 39

अलकावप्रमौन्नत्यं स्वोन्नतादमरावतीम् ।
मत्समो सदृशो वेत्ति हासं कुर्वन्निव स्थितः ॥ 40

गन्तुं यातुं विधातुं वा ऊर्ध्वं यातुं च शक्नुयाम् ।
कृतं हनुमतावप्रं गन्तुं सर्वैरशक्यकम् ॥ 41

कृत्वा प्राकारविभवं सर्वापि छन्नमण्डलम् ।
एकद्वारं प्रकल्पाथ स्वयमातिष्ठ तत्र वै ॥ 42

विभीषणं च सुग्रीवमुवाच वदतांवरः ।
बालवप्रं दुराधर्षं सुरासुरगणैरपि ॥ 43

राजंस्त्वं पूर्वयामे तु सर्वरक्षार्थमञ्जसा ।
वप्रे परिचरन्सर्वान् भ्रममाणश्च पश्यथ ॥ 44

यामे द्वितीयके रक्षन् नीलोऽपि व्यचरिष्य तु ।
चारभ्रमणसंयुक्त अङ्गदो जागरूकक: ॥ 45

संरक्षन्ति च सर्वांस्तान् जाम्बवान् तुर्ययामके ।
द्वाररक्षो भविष्यामि अहमत्रैव जाग्रतः ॥ 46

विभीषणोऽपि धर्मात्मा वप्राद्बहि च रक्षतु ।
अवश्यमेवं कर्तव्यं यत्ततो जागरूकया ॥ 47

इति निश्चित्य चतुरो रामरक्षणतत्परः ।
रामस्य पुरतः पश्चात् रक्षणाय विचक्षणः ॥ 48

नलं गवाक्षं गवयं वेगदर्शिनमेव च ।
ऋषभं शरभं चैवमैन्दवादि भटेषु च ॥ 49

रामस्य पुरतो दिक्षु रक्षणाय समादिशत् ।
ते सर्वे हनुमद्युक्तं यथासर्वं हनूमतः ॥ 50

जागारूकेण कुर्वाणो स्वस्वकार्यमतन्द्रितः ।
एवं हनुमता कृत्यं रात्रौ रामे सुषुप्तके ॥ 51

श्रीसूतः –

मैरावणस्य चरितं श्रोतव्यमनसूयया ॥ 52

अगस्त्यः –

भवद्रक्षण हेत्वर्थे वप्रं कृत्वा च मारुतिः ।
जागरूकस्थितो राजन् वायुसूनुर्महाबलः ॥ 53

देवादद्दष्ट्वा महत्कर्म आश्चर्येण समन्विताः ।
पुष्पवर्षाणि मुमुचुरुतुष्टव्य(स्तुष्टुवु ?)श्च सुरर्षयः ॥ 54

नृपे सुप्रभावे(निजं ?)वालवप्रं
प्रपश्यन् सुदृष्टासुवस्थायिनस्ते ।
निशापूर्वकाले दृशां व्यापहारी-
कपीनां च राशीन् विधानं चकार ॥ 55

इति जैमिनीभारते मारुतिमैरावणचरित्रे
सप्तमोऽध्यायः ।

अष्टमोऽध्यायः

श्रीसूतः –

ऐरावणोऽपि दुष्टात्मा दृष्टवान्शकुनं ततः ।
मायाबलविशिष्टस्य मम दुश्शकुनाश्च ये ॥ 1

किं करिष्यन्ति हे रक्ष इत्युदीर्य च रावणः ।
अनादृत्य च निश्शङ्कः शकुनान् राजसत्तम ॥ 2

निर्जगाम भटैस्सार्धं मन्त्रिमुख्यैस्समायिभिः ।
आगत्य वप्रकोटाय दूरात्तिष्ठन्महाबलः ॥ 3

घटकं च समाहूय श्रूयतामिति चाब्रवीत् ।
धृत्वा वानरवेषस्त्वं गत्वा वानरसंसदि ॥ 4

सुग्रीवो यत्र वसति हनूमान् यत्र तिष्ठति ।
विभीषणो हि धर्मज्ञः कुत्रास्ते मन्त्रिभिस्सह ॥ 5

रामो वा लक्ष्मणो वापि कुत्र कार्य प्रवर्तकौ ।
ये ये वानरमुख्यास्ते कुत्रत्याः कलहैषिणः ॥ 6

तेषां सर्वमभिप्रायं सर्वतस्संप्रचारयन् ।
दृष्ट्वा शीघ्रं पुनर्याहि क्षणेन न विशङ्कया ॥ 7

इत्युक्तो घटकश्शीघ्रं गत्वा वप्रप्रकारकम् ।
दृष्ट्वा प्रविशकं रन्ध्रं न लभेत च सर्वशः ॥ 8

केन वा कृतमेतच्च ब्रह्मणा वा कृतं यदि ।
एवं कर्तुमसाध्यं हि तस्यापीतिर्मतिर्मम ॥ 9

केन वा कृतमेतच्च ब्रह्मणा वा कृतं यदि ।
एवं कर्तुमसाध्यं हि तस्यापीतिर्मतिर्मम ॥ 10

वालेन वप्रकरणं न भूतो न भविष्यति ।
इति मत्वा प्रवेष्टुं स आकाशाल्लभ्यते मम ॥ 11

इत्यूर्ध्वगतिको भूत्वा मेघमण्डलमाश्रितः ।
तस्मिन् दृष्ट्वा वालवप्रं पुनरूर्ध्वं जगाम च ॥ 12

वायुमण्डलमासाद्य वालवप्रं स दृष्टवान् ।
किमेतदिति सम्मूह्य सूर्यमण्डलमाश्रयत् ॥ 13

तत्रापि वालवप्रन्तु दृष्ट्वा भीतियुतोऽभवत् ।
तत्र स्थित्वा वालवप्रमूर्ध्वं दृष्ट्वातिभीतिमान् ॥ 14

आद्यं तन्न च पश्यामः किमेतदिति चिन्तयन् ।
नाहं शक्यं मया गन्तुं वप्रगर्भं दुरासदम् ॥ 15

इति मत्वा निवृत्तो हि पुनर्भूमिमथाश्रयत् ।
हस्तेन तोलयाञ्चक्रे वालं मन्दबलोद्धतः ॥ 16

मूर्च्छितो न्यपतद्भूमौ हेतुं नाशकृताङ्गतः ।
अनासाद्य मतं तस्य रावणस्य दुरात्मनः ॥ 17

मैरावणं समासाद्य अब्रवीत् घटको वचः ।
श्रुणु राक्षस शार्दूल ! ममेदं व्याहृतं हि यत् ॥ 18

गतवानस्म्यहं तत्र प्रपश्यामि ततस्ततः ।
हनुमद्वालभागेन कृतं वप्रं महोन्नतम् ॥ 19

चन्द्रमण्डलमूर्ध्वं स्यादधस्ताच्च रसातलम् ।
नीरन्ध्रं कठिनं गुप्तमास्थूलं दशयोजनम् ॥ 20

वालं प्राकारसदृशं न भूतं न भविष्यति ।
भेतुं तोलयितुं वापि देवैरपि दुरासदम् ॥ 21

कुतश्शक्यं मया गन्तुं परितः प्लावितोप्यहम् ।
ऊर्ध्वमाप्लावितं वप्रमासूर्यं मण्डलं मया ॥ 22

तत्रापि द्रष्टुं प्राकारं ततो गन्तुमशक्नुयाम् ।
आगतोऽस्मि पुनः पादौ दृष्ट्वा वेगादधोत्थितः ॥ 23

एतावता मया साध्यं त्वयाप्युक्तमनर्थकम् ।
घटकेनैव मुक्तस्तु दन्तान् कटकटापयन् ॥ 24

चुकोप भृशमत्युग्रो नेत्रादश्रूण्यवर्तयन् ।
हस्ते हस्तं प्रपीड्याथ धून्वन्मौलिं विजृभ्य च ॥ 25

दुधुवे गात्रमाभोगं भ्रुवोर्वक्रीकृतोऽभवत् ।
निर्भर्त्स्य घटकं रक्षो मूढस्त्वं व्रज पृष्ठतः ॥ 26

परप्रोत्सहनं वृत्तं पश्यामि पुरुषाधम ।
इत्युक्त्वा राक्षसश्रेष्ठमन्यं सूचिमुखं तदा ॥ 27

वीक्ष्योवाच व्रज त्वं हि वालं निर्भिद्य साधय ।
रामं च लक्ष्मणं चैव गृहीत्वा पुनरावृज ॥ 28

सूचीमुखोप्येवमुक्तो वालप्राकारमण्डलम् ।
गत्वा विपरिवृत्ताङ्गो भ्रामयन् परितो दिशम् ॥ 29

नीरन्ध्रं सर्वतो पश्यन्नूर्ध्वं गन्तुमशक्तत: ।
अधो मार्गेण वप्रस्य गन्तुमैच्छत्स राघव: ॥ 30

छिद्रदण्डं समादाय अकरोद्बिलगह्वरम् ।
वालवप्रस्य निकटे कृत्वा बिलमतन्द्रित: ॥ 31

दशयोजनपर्यन्तं खात्वा दण्डेन वीर्यवान् ।
वालवप्रं च तत्रापि दृष्ट्वा बलमदोद्धत: ॥ 32

ईषद्रन्ध्रं प्रपश्याथ मुखेनैश्छत्प्रवेशनम् ।
सूचीकृत्य मुखं रन्ध्रे ओजसा गन्तुकामुक: ॥ 33

द्वौ पादौ बहिराच्छाद्य मुखे वालस्य मध्यगे ।
वालानि लिलिहेप्यासन्नीरन्ध्राकर्षकोभवत् ॥ 34

वध्नको भग्नतामाप नासया सहितो नृप ।
आनासेप्यतिलग्ने भोगवालस्य कर्षणे ॥ 35

विह्वलो निर्गमात्सोऽपि भीत्कारात् कृष्यनासिकाम् ।
वेगेन विचकृष्याथ नासापि शकलीकृता ॥ 36

भग्ने नासत्रुटी प्राप्ते श्रावयन् शोणितान्बहून् ।
मूर्च्छितो पुनरुत्थाय लज्जितो पूर्वकल्पनै: ॥ 37

व्रीळाननोथ विकृतो मैरावणमथापि च ।
सूचीमुखं हीननासं केन प्राप्तमिदं भवान् ॥ 38

सूचीमुखो ह्रियाविष्टो उवाच च स राक्षस: ।
घटकस्य वचस्तस्य नासत्वं कथयामि ते ॥ 39

हनूमता कृतं वप्रं बालेन परिवेष्टितम् ।
प्रवेष्टुं बहुयत्नानि अकुर्वन्तौ च साधने ॥ 40

अद्धारादूर्ध्वतः पश्यन् भूम्यां बिलमथाकरम् ।
दशयोजनगां भिद्य दृष्ट्वा वालं हि तत्र च ॥ 41

नासिकापुटघातेन मतनोद्भग्नतामियात् ।
एवमुक्तस्तु चुक्रोध अतिमूढो दुरात्मकः ॥ 42

उपायरहितो यस्त्वं प्राप्तवानीदृशीं व्यथाम् ।
अहमेव गमिष्यामि यत्र रामस्य लक्ष्मणः ॥ 43

इत्युक्त्वा तूर्णमागत्य सर्वमाया विशारदः ।
माया विभीशणो भूत्वा सर्वावयवशोभितः ॥ 44

हनूमता कृतं वप्रं दृष्ट्वा विस्मितमानसः ।
रामं सङ्कीर्तयन्तत्र हनूमन्तमपश्यत ॥ 45

हनूमन्नञ्जनासूनो दृष्टोऽस्मि परितश्चरन् ।
सर्वत्र भद्रमभवद्यामे प्राथमिके बहु ॥ 46

जाग्रतो भव ! विस्रब्धं वायुपुत्र ! महाबल ! ।
राक्षसा विविधोपाया वञ्चका आततायिनः ॥ 47

तस्मात्ते कारणं त्वद्य ब्रवीमि च पुनःपुनः ।
राघवौ च महात्मानौ सर्वराक्षसमर्दकौ ॥ 48

महाबलौ दुराधर्षौ द्रष्टुमिच्छाम्यहं कपे ।
दृष्ट्वा संसेव्य तौ देवौ तत्रस्थान् रक्षकानपि ॥ 49

जागरीकृत्य रक्षार्थे आयास्येहं पुनः कपे ।
एवमुक्तस्तु हनूमान् विभीषणमुवाच ह ॥ 50

आकारे स्वरयोगे च प्रमाणे चेङ्गितेऽपि च ।
अविशङ्क्य महाबाहो निश्शङ्केनान्तरात्मना ॥ 51

विभीषणमहाप्राज्ञ दृष्ट्वा रामं सलक्ष्मणम् ।
शीघ्रमागच्छ भद्रं ते रामभक्तोऽसि साम्प्रतम् ॥ 52

इत्युक्त्वा वालमुन्नम्य किञ्चिद्दत्वा पथं तदा ।
अतिष्ठत्तत्र विस्रब्धो जाग्रतोऽतुल विक्रमः ॥ 53

मैरावणोऽथ सम्प्राप्य द्वारान्निर्गत्य सत्वरम् ।
स्तुत्वा भवन्तं विविधैः जिह्मकारी दुरात्मकः ॥ 54

सर्ववानरमुख्यांस्तान् फूत्कारेण विमोहयन् ।
माया चूर्णानि विकिरन् विसृजन्भूतिमन्त्रितम् ॥ 55

मायाजालं समायोज्य निद्रामन्त्रमुदीरयन् ।
संर्वान्सम्मोहयामास परया निद्रया मुहुः ॥ 56

समीपं राममासाद्य दृष्टवानष्टवानरान् ।
नेत्राकर्षणया व्याप्तान्नेत्रमार्गाणि रोधयन् ॥ 57

मनोत्कर्षणमन्त्रेण मनांसि च विलोकयन् ।
मदाकर्णनमात्रेण शोधयित्वा च तान् कपीन् ॥ 58

निद्रापटेन चाच्छाद्य रामान्तिकमथा ययौ ।
दिक्षुरक्षाविधानज्ञा निद्रया कलुषेन्द्रियः ॥ 59

निद्रां कुर्वन्ति ते सर्वे मायाजालैः प्रलोभिताः ॥ 60

इति विपुलतमोभिभूतदेहा-
स्तदनुमनोतिकार्यविप्लवास्ते ।
निशि जलदा भवतुल्यवर्णा-
स्सुररिपुमन्त्रविहारिणो भवन् ॥ 61

इति जैमिनीभारते मारुतिमैरावणचरित्रे
अष्टमोऽध्यायः ।

नवमोऽध्यायः

अगस्त्यः –

मैरावणस्य चरितं श्रुणु राम मयोदितम् ।
भवन्तौ ग्रहणे यत्नः चरितं महदद्भुतम् ॥ 1

निद्रासक्तौ युवां दृष्ट्वा चेष्टायुक्तौ शरीरकौ ।
दृष्ट्वा च विपुलां मायां प्रयोक्तुमुपचक्रमे ॥ 2

मायापोट्टलचूर्णेन विकीर्योपरि मण्डले ।
शिलां सीत्कृत्य वेगेन निद्रयाच्छाद्य तौ तदा ॥ 3

विचेष्टौ कारयित्वा तु मन्त्रपाशेन बन्धयन् ।
आसुरीविद्यया जातां कृत्रिमां रत्नभूषिताम् ॥ 4

पेटिकां लघुभूतां तां भूमौ निक्षिप्य चादरात् ।
भराकर्षणमन्त्रेण नियोज्य त्वां महाबलः ॥ 5

निक्षिप्य पेटिकायां हि बन्धीकृत्य च राक्षसः ।
बाहुमूले तु संयोज्य गत्वा त्वरितविक्रमः ॥ 6

जगाम लघुवीर्येण मारुतीं तमुवाच ह ।
वायुसूनो महाबुद्धे दृष्टोऽस्मि रामलक्ष्मणौ ॥ 7

निद्राविशदहेतावास्तां तौ नृपवरात्मजौ ।
वानरास्सर्वतो रक्षन् तिष्ठन्त्यत्र न संशयः ॥ 8

अहं हि वालवप्रस्य बहिर्गत्वा चराम्यतः ।
इत्युक्तो हनुमांस्तस्य द्वारं कृत्वा विसृज्य च ॥ 9

पुनः पिधाय वालेन तत्रातिष्ठत मारुतिः ।
कण्ठे पाशं समासज्य त्वामादाय मदोत्कटः ॥ 10

पातालंलङ्कां प्रविशत् समन्त्रिगणयूथपैः ।
पद्मनालेन संविश्य लङ्कां प्राप्य स रावणः ॥ 11

भूतप्रेतपिशाचाद्यैश्शाकिनीगणसेवितम् ।
वेतालडाकिनीभिश्च मारीचग्रहमण्डितम् ॥ 12

अपस्मारादि कूष्माण्डग्रहशोभितमालयम् ।
भद्रकालीगृहं गत्वा बल्यर्थे पेटिकां ततः ॥ 13

निक्षिप्य देवीं संस्तुत्य बलिं प्रातर्ददामि ते ।
सर्वावध्यत्वतुलं मम देवि त्र्यम्बिके ॥ 14

इति स्तुत्वा महावीर्यस्तत्र निक्षिप्य पेटिकाम् ।
पुनर्निर्गत्य च बहिर्द्वास्थानाह महाबलः ॥ 15

जागर्तव्यं हि यत्नेन द्वारं कक्ष्यं च रक्षथ ।
प्रकारे सर्वथायत्ता तिष्ठध्वमविशङ्कया ॥ 16

शतघ्नीकूटे यन्त्रे च रक्षध्वं वप्रमार्गके ।
तोरणे वप्रशाखासु जागरूकेण वत्स्यथ ॥ 17

तुला द्वारे त्वरे यूयं रक्षिष्यामि च जाग्रतः ।
एवं सन्दिश्य दूतांस्तान् विवेशान्तःपुरं तदा ॥ 18

तद्वार्ता प्रकटाह्यासीत् पातालस्थाश्च सर्वशः ।
अथ गृहीतमाश्चर्यं दशकण्ठारि दुर्जयम् ॥ 19

इति सर्वे ब्रुवन्ति स्म सस्त्रीबालाश्च सत्वरम् ।
एवं गृहीते रामेऽपि लक्ष्मणे चापि वीरके ॥ 20

देवानों च महर्षीणां भयं च सुमहाविशत् ।
अकालेऽप्यभवत्कम्पो भूम्यां रघुकुलोद्भव ॥ 21

पर्वतानां च श्रृङ्गाणि निपतन्ती महीतले ।
समुद्रो घोषयामास सस्वनाश्च दिशो दश ॥ 22

ब्रह्माविदिवृत्तान्तश्शङ्कितोह्यभवत्तदा ।
रुद्रो विचारयन् दृष्टिं ध्यानारुढोभवत्तदा ॥ 23

एतस्मिन् समये प्राप्ते बुद्धिमांश्च विभीषणः ।
दृष्ट्वा दुश्शकुनं तत्र वप्रभ्रमणसम्प्लवे ॥ 24

विपरीतं दिनं दृष्ट्वा किमेतदिति चिन्तयन् ।
रामं च लक्ष्मणश्चैव द्रष्टुं वेगेन चागतः ॥ 25

हनुमन्तमथासाद्या उवाचेदं वचश्शुभम् ।
हनुमन्नञ्जनासूनो स्वामिकार्य धुरन्धर ॥ 26

विपरीतं हि पश्यामि रामस्यार्थे त्वयि स्थिते ।
रामं दृष्ट्वा निवर्तिष्ये मार्गमाधस्व मारुते ॥ 27

एवमुक्तस्तु हनूमानुवाच च विचिन्तयन् ।
विभीषण महाप्राज्ञ पुनरायासि किं वृथा ॥ 28

दर्शनार्थेऽभिरामस्य मयामार्गं स लभ्यताम् ।
दृष्टोहमिति मामुक्त्वा प्रविश्यान्ते पुनः पुनः ॥ 29

त्वं पुनः किमिहायातः वद राक्षस पुङ्गव ।
त्वां मत्वा रामभक्तं च द्वारं दत्तं मयाभि भो ॥ 30

इदानीमागमं दृष्ट्वा शङ्केहं रक्षसां वर ।
हनूमताप्येवमुक्तो दुःखशोकसमन्वितः ॥ 31

उवाच मारुतिं तत्र त्वदत्तं मार्गं अद्य नः ।
त्वामामन्त्र्य बहिर्द्वारात् चरित्वा किल याम्यहम् ॥ 32

केन मायाविधिज्ञेन वञ्चितं नात्र संशयः ।
जागरूकस्य तव जाड्यत्वं कुत आगतम् ॥ 33

मम वेषं समादाय त्वयाभाष्य च किं मया ।
अन्तःप्रविश्य रामं च चोरयित्वा ध्रुवं गतम् ॥ 34

हनुमन्नञ्जनासूनो कार्यहानिः कृता त्वया ।
गते कार्यं हि कर्तव्यं किं वा चिन्त्यं विचारय ॥ 35

तौ दृष्ट्वा शीघ्रमागच्छ वालवप्रं विसर्जय ।
विलम्बं मा कुरुष्व त्वं कालो हि दुरतिक्रमः ॥ 36

मैरावणस्य मायाभिः वञ्चितो निश्चितं महत् ।
विभीषणेनैव मुक्तो हनुमान्मारुतात्मजः ॥ 37

दुःखशोकसमाविष्टस्तेनेव सह सङ्गतः ।
विभीषणेनैव मुक्तो हनुमान्मारुतात्मजः ॥ 38

दुःखशोकसमाविष्टस्तेनेव सह सङ्गतः ।
विभीषणश्च हनुमान् न दृष्ट्वा रामलक्ष्मणौ ॥ 39

मूर्च्छितौ न्यपतन्तौ च पुनससंज्ञामवापतुः ।
नेत्राभ्यामश्रुपूर्णाभ्यां रुदित्वा तौ पुनः पुनः ॥ 40

हा ! राम राममहाबाहो क्व गतोसि स लक्ष्मणः ।
इत्येवं प्रलपंत्यत्र द्वितीयार्धेन यामके ॥ 41

आगतो हि च सुग्रीवः किमेतदिति चिन्तयन् ।
रामः क्व गच्छति ? कपे ! लक्ष्मणः क्व च तिष्ठति ॥ 42

किमर्थं रोदिषि भृशं सर्वेषां भयकारणम् ।
इति ब्रुवति सुग्रीवे हनूमान् राक्षसर्षभः ॥ 43

मैरावणोऽपि दुष्टात्मा रावणस्य सखा बली ।
वेषं वैभीषणं कृत्वा राममादाय गच्छति ॥ 44

रामं च लक्ष्मणं चैव कथं धृत्वाधिगन्तवान् (हि नीतवान् ?) ।
केन मार्गेन संयातः न जाने राजसत्तम ॥ 45

इत्युक्तो विपुलग्रीवो सुग्रीवो दुःखितो भृशम् ।
प्रलापयितुमारेभे मुख्यसख्यवियोगतः ॥ 46

हा ! रामराम महाबाहो ताटकी प्राणहारक ।
हविरायासुहरण हा मरीचस्य दर्पह ॥ 47

एवं प्रलापयाश्चक्रे सुग्रीवो हेमपिङ्गलः ।
अङ्गदो रोदयामास भृशं विह्वलचेतनः ॥ 48

हा सीतामनोरञ्जन हा कबन्धजीवापह ।
हा गाधि यागरक्षण क्व (कुत्र ?) गतो मां विहाय ॥ 49

नीलः– हा दशरथनन्दन ! अहल्याशाप विमोचन ! हा रुद्रचापखण्डन ! अस्मान् विहाय क्व यासि ?

जाम्बवान् – हा देवगणवन्द्य, हा खरदूषण मर्दन, हा भूसुर भयापहास्मान्विसृज्य क्व यातोऽसि ।

हनूमान् – हा कथं राम गन्तासि तीर्थ्वा रावणसागरम् ।

मैरावणस्य कुल्यायां मज्जितोसि महामते ।
हत्वा रावणतज्जन्यं मेघनादं विहत्य च ॥ 50

मैरावणस्य मायायां गृहीतोऽसि महागुरो ।
एवं पुरुदिते काले सर्ववानरपुङ्गवाः ॥ 51

दुःखशोकसमाविष्टाः का कथास्मीति चिन्तयन् ।
एवं द्वीतीययामे तु मध्यमे वानरर्षभाः ॥ 52

हनूमान् कोपसंयुक्तो वानरानित्युवाच ह ।
पश्यध्वं वानरश्रेष्ठा मम वीर्यपराक्रमम् ॥ 53

ब्रह्माण्डं भेदयिष्यामि स पातालमहार्णवम् ।
आकाशं पातयिष्यामि सर्वदेवगणामपि ॥ 54

मर्दयाम्यसुरान् सर्वान् रामस्यार्थे सलक्ष्मणौ ।
सनक्षत्रग्रहैश्चन्द्र सूर्यदिक्पालसंयुतम् ॥ 55

घट्टयिष्याम्यत स्वर्गं बन्धयिष्याम्यहं सुरान् ।
राममादाय चागम्य यदि मुञ्चामि तान् सुरान् ॥ 56

असुरान् धावयिष्यामि रामलब्धार्थसिद्धये ।
मैरावणं च गन्तुं वै किमसाध्यं ममाभि(पि?) भो ॥ 57

तस्थानमार्गं लब्धं चेत् हनिष्यामि न संशयः ।
पाताललङ्कागमने मार्गं लभ्येत यन्मम ॥ 58

सरामं लक्ष्मणश्चैव साधयामि न संशयः ।
इत्युक्तवन्तं सुभृशं वानरं कोपपूरितम् ॥ 59

विभीषणो दीर्घबुद्धिरुवाच च वचश्शुभम् ।
मार्गं जानामि हनूमन् दर्शयिष्यामि तत्वतः ॥ 60

आगन्तव्यं मया सार्धं यत्र मार्गं च तत्र वै ।
इत्युक्त्वा पुनराचष्ट सुग्रीवप्रमुखान् कपीन् ॥ 61

श्रृणुध्वं वानरास्सर्वे सावधानेन चेतसा ।
रामग्रहणमस्माभिः भवद्भिर्वा कदाचन ॥ 62

प्रकाशीकरणं कार्यमनर्थकविषोपमम् ।
यद्यत्प्रकाशितं स्याच्चेत्तदानर्थोऽभिजायते ॥ 63

तूष्णीं भवथ विस्रब्धा मौनीभूताश्चा सर्वशः ।
इत्युक्त्वा हनुमत्सार्धं ययौ पातालमार्गणे ॥ 64

निशिचरपतिसहायमन्त्रपूतो
हरिपवनसुतो महाबलप्रधानः ।
हरिवरगणनाथ संस्कृतोभू-
र्नृपवरसुतयोः परिमार्गणे सम(श्रमः?) स्यात् ॥ 65

इति जैमिनीभारते मारुतिमैरावणचरित्रे
नवमोऽध्यायः ।

दशमोऽध्यायः

विभीषणश्च हनूमान् प्रस्थितो रघुपुङ्गवः ।
भवन्तौ मार्गमाणौ तौ लङ्कायां पूर्वमागकि ॥ 1

त्रिंशद्योजनपर्यन्तं गत्वा दूरं महद्वनम् ।
श्वापदैर्विविधैर्जुष्टं नानामृगनिषेवितम् ॥ 2

घोरभल्लूकनिकरं सिंहव्याघ्रनिषेवितम् ।
नानापक्षिगणैर्जुष्टं नानाराक्षससेवितम् ॥ 3

नालिकेरैश्च पनसैराम्रपाटलतिन्दुकैः ।
कपित्थजब्बीनीपैश्च तिमि(नि?) शैर्वञ्जुलैस्तथा ॥ 4

कोयष्टिककुभैर्लोध्रैः प्लक्षजाम्बीरकिंस(शु?)कैः ।
तिनिशैर्नक्तमालैश्च* पिप्पलैर्वकुलैरपि ॥ 5

दाडिमैश्चरकुञ्जैश्चाशोकैः कुरबकैरपि ।
वृक्षैश्च विविधोपेतं(तैः?) नन्दनोद्यानसन्निभम् ॥ 6

वनं प्रविश्य पश्यन्तौ तटाकं योजनद्वयम् ।
पुष्कराच्छादितं तोयं छन्नं कल्हारपंक्तिभिः ॥ 7

कुमुदैरुत्पलैश्चापि जलजैर्विविधैरपि ।
सहस्रपत्रैःकमलैश्शतपत्रैः कुशेशयैः** ॥ 8

---

* Repit MS

** Amarakosa

आसमन्तात् पद्मकैश्च पुष्पितं मुकुलीकृतम् ।
प्रमाणैर्घटसादृश्यैः पुष्पितैः पद्मराशिभिः ॥ 9

तटाकं शोभितं दृष्ट्वा षट्पदैरनुनादितम् ।
कोकिलैः कलहंसैश्च हंसैःकारण्डकैर्युतम् ॥ 10

अच्छन्मनोज्ञं सौभाग्यमतिशीतलमायतम् ।
तटाकमर्णवप्रख्यं दृष्टवन्तौ कुतूहलात् ॥ 11

तं दृष्ट्वा शोभितं चित्रं हनूमन्तमुवाच ह ।
मारुते दक्षिणकरं गृहीत्वा राक्षसर्षभः ॥ 12

हनुमन्पश्य ! पुष्पाणि स्थूलानि विविधानि च ।
तटाकमध्ये सम्भूतं कुड्मलं च विराजितम् ॥ 13

चतुष्कोणविधानाढ्यं पुष्पितानि किलान्तरे ।
तन्मध्ये दृश्यते पश्य षट्कोणाकारमण्डले ॥ 14

तन्मण्डलस्य मध्ये तु शतसङ्ख्याकृतिस्समा ।
दक्षिणोत्तरवीध्या तु मध्यमे पञ्चविंशके ॥ 15

नलिनं नैल्यरूपं हि स्थलं दृढमनोज्ञकम् ।
श्लक्ष्णं विकसितं पश्य ! जलादुपरिनालके ॥ 16

तत्पद्मकर्णिकामध्ये मार्गं तिष्ठति सूक्ष्मकम् ।
तन्नालमार्गमासाद्य गन्तव्यं सूक्ष्मरूपतः ॥ 17

त्वं सूक्ष्माकृतिको भूत्वा प्रविशस्स(स्व?) महाबल ! ।
एतावन्मात्रमस्माभिरनुभूतिं पुरासखे ॥ 18

मया तप्तं सहस्राणि वर्षाणि नवपञ्च च ।
एतद्रोधसि भागे तप्यता च मया तदा ॥ 19

मैरावणे दुराधर्षो लङ्कां गत्वा पुनर्गतः ।
गतिस्तद्राक्षसस्याहं यातायातविचारणम् ॥ 20

अवश्यं पद्मनाले तु नान्यत्र न लभेत् पथि ।
रामं सायर्य(चानय?)शीघ्रं त्वं अहं यास्यामि सैनिके ॥21

दर्शयित्वा च तन्मार्गं तर्जन्याङ्गुलिकामुहुः ।
निवृत्तसेनया युक्तः कामरूपेण संवृतः ॥ 22

हनुमानपि विश्वात्मा कामरूपधरोऽभवत् ।
सूक्ष्मरूपं समासाद्य तस्मिन्नाले निपत्य ह ॥ 23

विभीषणोक्तं यल्लिङ्गं पद्मनालं प्रविश्य च ।
सूक्ष्मरूपधरो विद्वान् प्रवेशसमये तदा ॥ 24

मत्स्यवल्लभनामा च महाबलपराक्रमः ।
तिमिङ्गलायामुत्पन्नः अञ्जनेयात्महाप्रभो ॥ 25

सर्वेषामेव मत्स्यानां राजत्वं प्राप्तवांस्तदा ।
तपसा च वरं लब्ध्वा प्राप्तबन्धून्यनेकशः ॥ 26

मैरावणस्य च सखा तटाकस्य च रक्षकः ।
देवासुरगणैर्वापि अप्रवेश्यं दुरासदम् ॥ 27

पद्मनालस्य मार्गं च रक्षणायनिवेशितः ।
स मत्स्यवल्लभो धीरः दृष्ट्वा वानरपुङ्गवम् ॥ 28

सूक्ष्मरूपधरं ह्युग्रं वेगेनाह(ग?)त्य वीर्यवान् ।
मा गच्छागच्छ ! को वेति पुनः पुनरुदाहरत् ॥ 29

मारुतिं रोधयामास हस्तेनाकृष्य वीर्यवान् ।
हनुमान्वेगसम्पन्नो विघ्नोऽयं समुपस्थितः ॥ 30

इति निश्चित्य मनसा वालेनाच्छाद्य कन्धरम् ।
समुद्रे पातयामास चण्डवायुरिवाम्बुदौ ॥ 31

पतितः पुनरुत्थाय वेगनागत्य वीर्यवान् ।
मुष्टिं सवर्तयामास आञ्जनेयशिरोपरि ॥ 32

अरत्निघातं च पुनः पृष्ठभागे समर्पयत् ।
तं मत्स्य वल्ळभं वीक्ष्य मुष्टिनाभिजघान च ॥ 33

तलेनोरसि चाहत्य पद्मिन्यां पातयत्तदा ।
त्वस्या पुनरुत्थाय गृहीत्वा मारुती दृढम् ॥ 34

तटाके पातयामास सोऽपि तं च बलात् बली ।
हनूमानपि सञ्चिन्त्य तं गृहीत्वा विचक्षणम् ॥ 35

आकाशे भ्रामयामास दूरतो विससर्ज ह ।
तथापि वेगादागत्य हनूमन्तमताडयत् ॥ 36

दन्ताभ्यां चरणाभ्यां च घट्टयामास मारुतिम् ।
वायुसूनुरपि शीघ्रं तं हन्तुं (च?) कृतनिश्चयः ॥ 37

मुष्टिभ्यां चरणाभ्यां च दन्ताभ्यां नखकोटिभिः ।
अरत्निघातैरुग्रैश्च मर्दयामास तन्मुहुः ॥ 38

सबली मत्स्यराजस्तु क्रोधेन कलुषीकृतः ।
तलप्रहारैः पाण्यग्रैः दन्ताग्रैर्भृशदारुणम् ॥ 39

पीडयाञ्चक्रिरे घोरं हनुमन्तं बलोत्कटः ।
मत्स्यराजस्य (चरितं?)* अद्भुतं रोमहर्षणम् ॥ 40

युद्धं समभवद्धोरं यमरावणयोरिव ।
यथा बलिहरेर्युद्धं यथा वृत्रस्य जम्भयोः(म्भुणा?) ॥ 41

शिवविष्णो यथापूर्वं तथा युद्धमवर्तत ।
आकर्षणे मुष्टिघाते तथा रत्नविघट्टने ॥ 42

मोटने मर्दने चैव प्लवने गर्जनेऽपि च ।
आकर्षणे विमर्दे च द्वयोर्नासीत्पराजयम् ॥ 43

अत्रान्तरे महत्कर्म चिकीर्षन् वानरर्षभः ।
दन्ताभ्यां कर्णभागे तु ददर्श कपिकुञ्जरम् ॥ 44

तथा तिमिङ्गिल सुतो ह्यनपायै ह्यताडयत् ।
ततो हनूमानुग्रेण वेगेनासाद्य तं बलिम् ॥ 45

विकृष्य दोर्भ्यामुन्नम्य नखाग्रैः दारयन्भृशम् ।
ददंश दन्तपङ्क्त्याथ मुष्टिना घट्टयश्छिरम् ॥ 46

नानाविधैः प्रकारैश्च उद्धमन्नृत्तसञ्चयः ।
भृशमुच्छ्वसितो वेगात् प्रहारैर्झरीकृतः ॥ 47

---

* in Palm leaf xxxx

श्रोत्राभ्यां (नेत्रभ्यां?)प्रसृजन्नश्रुं सर्वप्राणेन वेगतः ।
उरस्याभिजघानाशु शिलासदृशमुष्टिना ॥ 48

मुष्ठिप्रहारात् सञ्छिन्नो शोणितार्त्तोभवत्तदा ।
निर्विण्णोथ क्षणोह्यत्र ततस्तं प्रत्युवाच ह ॥ 49

आत्मनासदृशो योद्धुं कश्चिन्नान्यो महीतले ।
स्वर्गे पातालके चैव ममास्तीति मनीषितम् ॥ 50

मत्पराक्रमसादृश्यमितो पश्याम्ययं जनम् ।
उत्पत्तिं तस्य विज्ञानं धैर्यं विक्रममेव च ॥ 51

ज्ञात्वा युद्धे पुनर्योद्धुं मतिमास्थाय वानरः ।
युद्धकाले कथं ब्रूषे वीरधर्मं विसृज्य च ॥ 52

कुलगोत्रस्य कथनं किमर्थं वेत्तुमिच्छसि ।
स्वधर्मं कथयन्तं च आत्मपौरुषकत्थनम् ॥ 53

युद्धे पलायिनं दृष्ट्वा छान्द्रायणमथाचरेत् ।
एवं धर्मपश्यंस्तु भयं प्राप्येव कथ्यसे ॥ 54

इत्युक्तो हनुमानाह श्रोतव्यं मत्स्यवल्लभ ! ।
न मित्थ्यामर्णवं क्वापि नात्मस्तुत्यं करोमि च ॥ 55

ययोर्द्वयोर्यदि भवेत् युद्धं विरतरोद्धतम् ।
कुलपौरुष साजात्यं विदित्वा युद्धमाचरेत् ॥ 56

चतुर्विधा उपायास्ते सामदानादि भेदकाः ।
कुलश्रेष्ठे बलश्रेष्ठे सामन्तत्परिकीर्तितम् ॥ 57

समे च दानभेदं च जायते नात्र संशयः ।
विषमे दण्डमित्याहुः पण्डिताः समदर्शिनः ॥ 58

तस्माद्भेदितुमिच्छामि कुलं प्राथमिकं तथा ।
हनुमताप्येवमुक्तो मत्स्यवल्लभ आह च ॥ 59

मुदं पूर्विकया वाचा कथयामि च वानर ।
श्रृणु वानरशार्दूल ! मम जन्म च पौरुषम् ॥ 60

तिमिङ्गिला हि मन्माता पिता च हनुमान्कपिः ।
मैरावणस्य सखा अनुशिष्टोसि तेन वै ॥ 61

इह पुष्करमार्गेण गन्तुं देवासुरैरपि ।
अशक्यं राक्षसमार्गं रक्षिष्यामीहमोजसा ॥ 62

एवमुक्तस्तु हनूमान् शङ्कितो ब्रह्मचर्यया ।
मित्थ्या वाक्यं त्वयाप्युक्तं मन्येहं मत्स्यवल्लभ ! ॥ 63

हनूमान् ब्रह्मचारीति विख्यातं त्रिषु लोकयोः ।
चरितं ब्रह्मचर्यस्य नारीयोगं कथं भवेत् ॥ 64

मया प्रवचनस्याद्य त्वं(पृष्टवचाद्यन्तं ?)शंससि वदस्व मे ।
इत्यूचिवांसं शिवजं पुनराह सविस्तरम् ॥ 65

श्रृणु ! वानरमुख्यात्र हनुमान्दक्षिणार्णवे ।
सीतां मार्गयितुं लङ्कां सम्पातिवचनात्पुरा ॥ 66

रामाङ्गुलीयमादाय पुप्लुवे लवणार्णवम् ।
सागरे मध्यगे प्राप्ते स्वेतो बहुरजायत ॥ 67

प्रलेपयित्वा स्वेतं संमृष्ट्वा पिण्डरूपतः ।
समुद्रे पातयामास गमनोद्वेगवद्धृशम् ॥ 68

तिमिङ्गिला हि तत्रस्था तं पिण्डमगृहीद्धृशम् ।
तत्स्वेतभक्षयायैव गर्भो भूत्वा ह्यसूत माम् ॥ 69

तिमिङ्गिलादहं जातः अब्रुवन्तां पिता क्व च ।
साब्रवीत् वायुपुत्रेति मामुक्त्वा जननी गता ॥ 70

तदा प्रभृसि तत्रस्थो स्थितोऽस्मि बहुवासरम् ।
यक्षराक्षसगन्धर्वशाकिनीगणमार्गयन् ॥ 71

एवं स्थिते सति तदा ब्रह्मा आगत्य अम्बुधौ (ब्रह्मागत्य महाम्बुधौ?)।
स्नात्वा जप्त्वा च विविधान् जले मत्स्थानरोधसि ॥ 72

सालग्रामं स्वयंव्यक्तं पूजयामास वस्तुभिः ।
तस्मिन्महोदधीवृद्धया ग्राहकश्छपसङ्कुलः ॥ 73

तदा कश्चिज्जलचरो अ(म?)करोथ ग्रसच्चतम् ।
वेधास्सन्तप्तहृदयो सालग्रामविनाशनात् ॥ 74

अहं गत्वा च तं ग्राहं गृहीत्वाछिद्यवक्त्रतः ।
देवं गृहीत्वा देवाय ब्रह्मणे चार्पयत्तदा ॥ 75

मामब्रवीच्चतुर्वक्त्रो सालग्रामप्रदानतः ।
सन्तुष्टहृदयो भूत्वा सर्वविध्यं च दत्तवान् ॥ 76

कामरूपं महत्वं च अशोष्यं स्थानमेव च ।
मह्यं दत्तं महाबाहुर्ब्रह्मलोकपितामहः ॥ 77

को भवान् ? वीर्यसम्पन्नो मम वीर्यसमो ह्यसि ।
किमर्थमिह यातोऽसि ? कस्य पुत्रो भवानपि ? ॥ 78

एवमुक्तस्तु हनूमान् तमपृच्छद्दुरासदम् ।
अहं वायुसुतो विद्धानञ्जना सूनुरेव च ॥ 79

रामभृत्योहमभवत् मैरावणदिदृक्षया ।
आगतोहं हि हे वत्स मत्पुत्रोसि परन्तप ॥ 80

दिष्ट्या त्वद्दर्शनादद्य जितमामुष्मिकं ध्रुवम् ।
नापुत्रस्य च लोकोऽस्ति न्यायशास्त्रादिभिरोचितः ॥ 81

दशास्यं हन्तुकामौ तौ राजपुत्रौ शिवांशजौ ।
निद्रितौ चोरयित्वा तु गतवान् राक्षसाधमः ॥ 82

तं हन्तुमागतोऽस्मीह पुत्रप्राप्तिं च लब्धवान् ।
एवमुक्तो हनुमता स्वपित्रा मत्स्यवल्लभः ॥ 83

पुनः पप्रच्छ ! सन्देहात् निजरूपं च दर्शय ।
एवं वदति सत्तूर्ण विश्वरूपं च दर्शितम् ॥ 84

स दृष्ट्वा रूपम(व्यग्र) ह्यद्भुतं विश्वतोमुखम् ।
नत्वा नन्दाश्रुभिःपूर्णस्तमालिङ्ग्य मुहुर्मुहुः ॥ 85

यत्कृतं महिमया युद्धमज्ञानात्क्षन्तुमर्हसि ।
इदावनीमिव गत्वाहं हन्तास्मि मयि रावणम् ॥ 86

स्वामिद्रोही भविष्यामि परलोकभयादपि ।
अनार्यकृत्यमस्वर्ग्यं किल्बार्हामिव वायुज ॥ 87

सहायमात्रमिच्छामि किञ्चित्कर्तुमितो ह्यहम् ।
मैरावणो दुराधर्षः अनपायेन दुर्जयः ॥ 88

त्वयाप्यशक्यं लङ्कायां गन्तुं मैरावणस्य च ।
हस्वको भव यद्रूपं संहरस्व च हे पितः ॥ 89

त्वामादाय गमिष्यामि मैरावणपुरान्तिके ।
एवमुक्तस्तु पुत्रेण सूक्ष्मरूपधरोऽभवत् ॥ 90

भुजे निक्षिप्य पितरं गच्छन्नेवमुदाहरत् ।
वायुपुत्र ! महाप्राज्ञ ! श्रुणु ! वाक्यं हितं तव ॥ 91

इतः पातालङ्कायाः दशयोजनया युतः ।
एकयोजनपर्यन्तं गन्तव्यं एकमेव च ॥ 92

अतः परं योजनानां पञ्चानां विस्तराच्छुभम् ।
तोरणस्य बहिर्द्वारं पश्य वानरपुङ्गव ॥ 93

चत्वारो योजनाद्दूरं स्वर्णवेदिसमाकुलम् ।
स्वर्णकुड्यमणिस्तम्भं वेदिकायां सहस्रकम् ॥ 94

राक्षसस्य पुरीं श्रेष्ठामथापश्यत्तदन्तिके ।
पितरं दर्शयन् वप्रं परिघां मीनसेविताम् ॥ 95

मैरावणपुरीं रम्यां दर्शयित्वावरोप्य च ।
द्धारागमं च कथयत् ब्रह्मदत्तं महावरम् ॥ 96

तुलाभारमिति प्राहुः गन्तुं नालं सुरासुराः ।
एतावदुक्त्वा वचनं सुस्थानं च जगाम च ॥ 97

इति सुतवचनं निशम्य वाक्यं-
मुदितमनाः परमं प्ररूढिकार्यः ।
निशिचरपति संक्षयं विचिन्त्य-
सरभसवृत्तिसरस्समाससाद ॥ 98

इति जैमिनीभारते मारुतिमैरावणचरित्रे
दशमोऽध्यायः ॥

एकादशोऽध्यायः

हनूमानथ सञ्चिन्त्य वेत्तुं श्रीरामलक्ष्मणौ ।
सरस्समीपमासाद्य को वा वेदेति राघवम् ॥ 1

इति सञ्चिन्तयन्नास्ते ह्रस्वकस्तत्र मारुतिः ।
एतस्मिन्समये रक्षः दशाननसखा तदा ॥ 2

स्वान्तःपुरं प्रविश्याथ रामं बलिमचिन्तयत् ।
दुर्दण्डिमनुजां प्राह पादाक्रान्त सश्रृङ्खलाम् ॥ 3

चेटिकावृत्तिचरणीमित्युवाच च राक्षसीम् ।
श्रृणु ! दुर्दण्डिमद्वाक्यं सावधानेन चेतसा ॥ 4

दाशरथ्यौ मया ग्रस्तौ करिष्यामि बलिं हि तौ ।
बलिप्रदिष्टयोरर्थे जलमादाय सत्वरम् ॥ 5

त्वं गच्छ ! शीघ्रमनुजे नो चेत्वामद्य हन्मि वै ।
ब्रह्मदण्डसुते नैवमुक्त्वा दुर्दण्डिविह्वला ॥ 6

श्रृङ्खलासहितागत्वा आदास्यामि कथं जलम् ।
विसृज त्वं हि हे भ्रातः श्रृङ्खला करवाणि तम् ॥ 7

इत्युक्तः कोपसंयुक्तः लगुडेन जघान च ।
दुर्भगे चेटि शीघ्रं त्वं गच्छ मास्मद्वचो वद ! ॥ 8

इति निर्भर्त्स्य मूढात्मा कालपाशवशङ्गतः ।
दुर्दण्डी दुःखसम्भूता शोकाकुलितचेतसा ॥ 9

आदाय स्वर्णघटिकां विशालघटिकाय ताम् ।
पुराद्बहिस्सरस्तीरे श्रृङ्खलासहितां तथा ॥ 10

शनैश्शनैर्मन्दगत्या रामध्यानपरायणा ।
किं करोमि इदानीं तु रामोऽर्थे किं चराम्यहम् ॥ 11

राक्षसानां मदीं घोरां तीर्त्वा रावणपल्लवे ।
भ्रात्रा रामो निमग्नश्चेत् कालो हि दुरतिक्रमः ॥ 12

सुग्रीवो बलवांश्चैव हनूमान्सत्वसंयुतः ।
विभीषणो हि मर्मज्ञ नान्यादृशपराक्रमः ॥ 13

एतादृशा हि रामोर्थे न शक्ता रक्षितुं किल ।
मैरावणवशं नीतं रामं को वा वदिष्यति ॥ 14

निशायां शत्रुपक्षे तु न ज्ञातं हि सुषुप्तितः ।
इति चिन्ताकुलाविष्टा नेत्राश्रुललितानना ॥ 15

उदकानयनार्थाय इतस्तदविलोकयन् ।
आजगाम शनैस्सापि जलाशयमथाकुला ॥ 16

हनुमानपि तेजस्वी राक्षसीं वीक्ष्य दुःखिताम् ।
युतां श्रृङ्खलिना सार्धमश्रुनेत्रां विलोकिनीम् ॥ 17

अनया वेदितुं शक्यं रामस्थानं हि निश्चितम् ।
दुःखी दुःखयुतं प्राप्य कार्यं साधयितुं क्षमम् ॥ 18

इति निश्चित्य मनसाब्रवीत्तां विचक्षणाम् ।
का वासि भद्रे ! रोदिषिस्त्वं कमुद्दिश्य च तत्स्मृतिः ॥ 19

ईदृशी श्रृङ्खली येन प्राप्तासि वद कारणम् ।
कस्य पुत्री कस्य भार्या कस्य पत्नी सुखं वद ॥ 20

साश्रुनेत्रा किमर्थं च किमु रोदिषि शंस मे ।
मया व्यपोहितुं शक्यं तव दुःखं शुभानने ॥ 21

वानरेणैवमुक्तै सा दुर्दण्डी पुनराह च ।
को भवान् स्वल्पतनुकं कथं मद्दुःखलेपनम् ॥ 22

देवैरशक्यं मदुदुःखं लोप्तुं किं वा त्वया कपे ।
एवमुक्तस्तु हनुमान् राक्षसीं बुद्धिचिन्तकाम् ॥ 23

भृत्योहं कौसलेन्द्रस्य सुग्रीवस्य च सेवकः ।
हनुमानिति मामाहुः आञ्जनेयेति केचन ॥ 24

विदुर्बुधा मारुतीति संशयो नास्ति मे वद ।

दुर्दण्डी –

श्रुणु ! वानरशार्दूल ! ममेदं व्याहृतं वचः ॥ 25

ब्रह्मदण्डस्य च पुत्रोभूत् मैरावण सनमाः ।
ब्रह्मदण्डस्य शूरस्य पुत्रीचाहं हि मारुते ॥ 26

कालदण्डस्य भार्याहं मत्पुत्रो नीलमेघकः ।
अपुत्रा बहुवर्षास्मि दैवयोगात् सुतं लभे ॥ 27

ब्रह्मदण्डो हतश्शापात् दुर्वासस्य महात्मनः ।
मैरावणो मम भ्राता मेरुमासाद्य पश्चिमाम् ॥ 28

तपस्तप्त्वा महाघोरं निरुच्छ्वासां चकार ह ।
ब्रह्मागत्य चतुर्वक्त्रो मैरावणमथाब्रवीत् ॥ 29

वरं वरय भद्रं ते किमभीष्टं निशाचर ।
एवमुक्तस्तु तद्रक्षो नमस्कृत्य कृताञ्जलिः ॥ 30

स्थानं मे देहि भूतेश दुष्प्रापं देवमानवैः ।
सर्वावध्यत्वमतुलं देवासुर नरैरपि ॥ 31

देहि मे देहि देवेश प्रीतोसि यदि मे भवान् ।
विधाताप्येवमुक्तस्तु रावणाय ददौ वरम् ॥ 32

त्रयस्त्रिंशत्कोटिदेवैस्त्वं यक्षराक्षससङ्कुलैः ।
किन्नरोरगसिद्धैश्च मानुषैश्च पदादिभिः ॥ 33

गन्धर्वसाध्यकैर्वापि अजेयस्त्वं भविष्यसि ।
रसातले पुरी रम्या सप्तप्राकारमध्यमा ॥ 34

पञ्चाशद्योजनायामविस्तरात् परितस्तदा ।
अष्टाशीति समं ज्ञेयं योजनानि च कारयत् ॥ 35

शिवालयस्सप्तकोटि वीथिर्विष्णुत्रिलक्षकैः ।
नवरत्नविचित्रैश्च मण्डपाद्ययुतानि च ॥ 36

स्वर्णाढ्यं स्वर्णगृहं गोपुराट्टालचत्वरम् ।
विमानं पुष्पकयुतं सोपानं प्रासंसंयुतम् ॥ 37

गृहाणि शतकोटीनां कारयामास विश्वसृक् ।
चत्वारि परिघां कृत्वा कोटीनां च चतुश्शतम् ॥ 38

वप्रशाखाश्च निर्माय शतघ्नीस्थानकोटिभिः ।
निर्माप्य च पुनर्वेधा सर्वप्राकारमासृजत् ॥ 39

सुधामृत्तिकया कृत्वा द्वारमेकं प्रकल्प्य च ।
तद्वारे शत्रुविज्ञानाच्चुलामेकं च निर्ममे ॥ 40

एवं सृष्ट्वा च तं दृष्ट्वा पुरीं त्वं परिपालय ।
मृद्वारे तु तुलायास्त्वं सर्वान् सञ्चारयिष्यसि ॥ 41

शत्रुर्वा निपते तस्य अशत्रुर्वा भविष्यति ।
अधस्ताश्च तदूर्ध्वं च गमने सति यः पतेत् ॥ 42

एवं दत्वा चतुर्वक्त्रो तत्रैवान्तरधीयत ।
वरं लब्ध्वा मम भ्राता सुखासीने तदासने ॥ 43

अशरीरि उवाचेदं तदा मैरावणं प्रति ।
स्वश्रेयो तव राज्यार्हः परिनेष्यति त्वत्सुताम् ॥ 44

देवीं वाचं प्रतिश्रुत्य मत्पुत्रं हन्तुमैच्छत ।
एतस्मिन् समये भर्त्ता मम चाहं तमाप्य च ॥ 45

निपत्य पादयोस्तस्य पुत्रार्थे याचितौ भृशम् ।
तस्मिन्काले विसृज्याथ मम पुत्रं सुबालकम् ॥ 46

निगलं कारयामास भर्तारं च मया सह ।
दृढं श्रृङ्खलया बध्वा त्रिनेत्रा नन्वहं भृशम् ॥ 47

पीडयामास पापात्मा दासीकृत्यमयोजयत् ।
मम भर्ता मृतो यस्मात् श्रृङ्खलादुत्पपात सः ॥ 48

अहं दासीविधानेन प्रापितास्मि महामते ।
अस्मिन् भ्रात्रौ राजपुत्रौ चोरयित्वा स राक्षसः ॥ 49

भद्रकाल्यालये स्थाप्य बल्यर्थे मामयोजयत् ।
उदकाहरणायाथ आगतोऽस्मि यदृच्छया ॥ 50

त्वद्दर्शनात् सुसन्तोषं प्राप्ताहं रामसाधने ।
त्वत्तश्शक्यमशक्यं वा न जानामि महाकपे ॥ 51

कथं लभेत तौ देवौ तुलाभारेण वा गतिः ।
हनुमान्यदि यद्रूपं दिव्यं दर्शय वानर ॥ 52

एवमुक्तस्तु हनूमान् भृशं सन्तुष्टमानसः ।
रामभक्तात्वियं नारी सर्वावयवशोभिनी ॥ 53

इति मत्वा च तामाह मा भैषीः त्वं शुभानने ।
लङ्कायां स्थापयिष्यामि त्वत्पुत्रं गुरुलोचने ॥ 54

मत्स्वरूपं प्रपश्य त्वं विष्णोस्त्रैविक्रमं यथा ।
इत्युक्त्वा दर्शयामास सस्वरूपं महात्मनः ॥ 55

तं दृष्ट्वा सहसोद्विग्ना रूपं परमभास्वरम् ।
मैरावणशतं वापि हनिष्यामि न संशयः ॥ 56

उपसंहारयमास हनुमान् ह्रस्वतां गतः ।
तयामन्त्र्य प्रविष्टार्थे घटे स्वर्णाकृतौ शुभे ॥ 57

अङ्गुष्ठसमितो भूत्वा लग्नोभूच्च घटान्तरे ।
घटोदकं समादाय दुर्दण्डी शिरसावहत् ॥ 58

तुलाद्धारसमीपे तु गता सा निगलेन सा ।
धनुर्धराश्चतुर्लक्षातुला द्धारस्य रक्षकाः ॥ 59

विकोशायुधनिस्त्रिंशाः जागरूकाः निवेशिताः ।
मैरावणेन निर्दिष्टाः सर्वायुधधरास्तदा ॥ 60

मदोद्धताः गजारूढाः कोटिकोटिनिवेशिताः
तुलाविभग्ने पतने अनिमीलितलोचनाः ॥ 61

खड्गहस्तास्सहस्राणि राक्षसेन निवेशिताः ।
तैस्तैर्वीरतरैश्चापि रक्षितद्धारमाप सा ॥ 62

कनकशतायुतभारकृत्रिमोच्चैः
घटितकराहत चोदवानबन्धा ।
अतिगुरुकृतभार शृङ्गलाभ्यां
उपरितरेण जलाहता प्रतस्थे ॥ 63

इति जैमिनीभारते मारुतिमैरावणचरित्रे
एकादशोऽध्यायः ।

✲ ✲ ✲

द्वादशोऽध्यायः

अगस्त्यः –

घटे विधाय दुर्दण्डी हनुमन्तं स श्रृङ्खला ।
तुलाद्वारे तदा गत्वा समारोह च सत्वरम् ॥ 1

आरुह्य पादमाधाय तुलाभागं गते सति ।
ब्रह्मणस्सत्य योगाच्च शत्रूवाहात् बभञ्ज च ॥ 2

तुलाभङ्गे तदा जाते तां दृष्ट्वा द्वाररक्षकाः ।
आवपुर्घोररूपास्ते विकर्षन्तश्च सायुधाः ॥ 3

भीषयन् शूलमादाय आगतान्ये महाबलाः ।
खड्गहस्ताभीशुकरास्तोमराङ्कुशपाणयः ॥ 4

पर्ययावन्गजस्थास्तां वलयीकृत्य राक्षसीम् ।
ऊचुर्परमरोषास्ते किमेतदिति भीषयन् ॥ 5

उदकानयने याते तुलास्वस्था भवत्युत ।
इदानीं भग्नतां प्राप्तो मन्ये त्वां शत्रुरित्यहो ॥ 6

दौरात्म्य भाविनीं त्वां च सपुत्रां च हनिष्यति ।
इति सन्तर्ज्य वेगेन वचोभिः क्रूररूपकैः ॥ 7

आरेभिरे च तां पालाः निबन्धयितुमोजसा ।
दण्डैः प्रहरणैः केचित् रज्जुभिः शणवल्कलैः ॥ 8

बध्वा हन्तुं समारब्धाः परिवव्रुरितस्ततः ॥ 9

अत्रान्तरे मारुती पुङ्गवाग्र्यो
कुम्भाच्च भग्नात्सहसोत्पपात ।
भवस्थलं प्राप्य महानुभावो
प्ररोहयामास तदग्रतोरणम् ॥ 10

सो पर्वतश्चोग्रतरेण कार्ष्ण्यं
स्तम्भं समाकृष्य करेण चाग्रः ।
द्वारिस्थितान् राक्षसयूथमुख्यान्
विद्रावयामास कपिप्रवीरः ॥ 11

संवर्ध्य वालं सुरशत्रुवर्गान्
कण्ठे समासज्य शिलातलेघ्नन् ।
गजप्ररूढान् सगजेन सार्धं
कण्ठे समासज्य जघान चोर्व्याम् ॥ 12

सोपप्लुत्य महावेगात् भारायुतविनिर्मितम् ।
स्तम्भमुत्पाटयामास भ्रामयित्वा मुहुर्मुहुः ॥ 13

राक्षसास्ते महाकायाश्शूलमुद्गरपाणयः ।
महाकपिमहाकायं समरे चण्डविक्रमम् ॥ 14

दृष्ट्वा निश्शङ्कमतुलं शलभाग्निरिवापतन् ।
भिण्डिपालैश्च परिघैः प्रजघ्नुस्तं महाकपिम् ॥ 15

तोमरैः खड्गपाशैस्च अन्ये जघ्नुश्च वानरम् ।
आयसैः मुद्गरैः घोरैः मर्दयन्तश्च तं कपिम् ॥ 16

एवं प्रकारा बहवो राक्षसा वानरर्षभम् ।
प्रहर्तुमागतास्तत्र तत्र दृष्ट्वा च मारुतिः ॥ 17

तं स्तम्भं भ्रामयित्वा तु शोषयामास राक्षसान् ।
पादेनान्यान्नखैः कांश्चिन्मुष्टिना सह मर्दयन् ॥ 18

स्तम्भेन सर्वरक्षांसि पातयामास भूतले ।
विशीर्णनयनाः केचित् भिन्न गण्डोष्ठतालुकाः ॥ 19

भूम्यां पपात विशिरो प्रेतरूपाः गतासवः ।
तुलारक्षकरक्षांसि नवलक्षधनुर्धराः ॥ 20

द्वाररक्षाचतुष्कोटिः बलिनो विकृताननाः ।
गजस्थास्साश्वपृष्ठस्था निश्शेषाः निर्गतासवः ॥ 21

यामार्धेन गतास्सर्वे वानरेण महात्मना ।
मृद्वपुं पातयित्वा च कांस्य वप्रं समासता ॥ 22

तत्रस्थान् चूर्णयामास स्तम्भेन विविधानृणे ।
निभिद्य वप्रमन्यत्र गत्वा कार्ष्ण्यमयं दृढम् ॥ 23

वप्रमासाद्य हनूमान् तत्रस्थान् प्रममन्थ च ।
अद्वारेण समासाद्य योद्धुकामं महाकपिम् ॥ 24

अथोवाच च दुर्दण्डी विस्मिता युद्धशौण्ड(वम् ?)।
राक्षसानां विनाशं च दृष्ट्वा विस्म्मितमानसः ॥ 25

श्रृणु ! वानरशार्दूल ! ममेदं व्याहृतं वचः ।
त्वदागमनमव्यग्रो ज्ञात्वा रोषो महाबल ॥ 26

हनिष्यति महात्मानौ तस्माद्गरन्तव्यमञ्जसा ।
कालिकोष्ठं समासाद्य रामं दृष्ट्वा भवान् कपे ॥ 27

पुनरागम्य युद्धाय कुरुष्व ! मतिमुत्तमाम् ।
विज्ञाय वाचं तस्याश्च कालिकोष्ठं तया सह ॥ 28

भूतप्रेतपिशाचानां आलयं कालिकालयम् ।
सम्प्रापश्यन्हनूमन्तं दुर्दण्डी इदमाह च ॥ 29

अत्र वानरशार्दूल कालिकालयवासिनः ।
परितो रक्षका आसन् राक्षसा नवकोटयः ॥ 30

महाबलविशिष्टास्ते शस्त्रपाणिविनिर्भयाः ।
अगत्वा तां च गन्तुं वै आलयं भद्रकालिनीम् ॥ 31

अशक्यं वानरश्रेष्ठ तथाकुरु महाकपे ।
एवमुक्त्वा पुनः प्राह निर्गलं मम मोचय ॥ 32

माया निगलमन्त्रेण कारितं राक्षसेन वै ।
मयेयं श्रृङ्खली भग्ना न भग्ना मायिकात्तदा ॥ 33

आक्रान्त श्रृङ्खला त्वां तु गन्तुं नार्हास्मि वानर ।
इत्युक्त्वा वचनं तस्याः हेतुमत्परमार्थकम् ॥ 34

वज्रलेखी च मन्त्रेण श्रृङ्खली मोचयत्तदा ।
ब्रह्मविज्ञानमन्त्रेण मायामाहत्य राक्षसीम् ॥ 35

स्वस्थां चकार तामाह ऐहि भद्रे मया सह ।
इत्युक्त्वा पुनरुत्पत्य काल्यालयमथा गतः ॥ 36

हनुमान्वेगसम्पन्नो द्वाररक्षणतत्परान् ।
स्थूणेन मर्दयामास द्वास्थान्मद बलोद्धतान् ॥ 37

कवाटं घातयित्वा तु पादेन भृशमोजसा ।
प्रवेष्टुं समये घोराः राक्षसाः कूटयोधिनः ॥ 38

मुद्गरायुधहस्ताश्च सन्नद्धा युद्धदुर्मदाः ।
हनुमन्तमभिद्रुत्य सर्वप्रहरणैर्युधि ॥ 39

प्रजहि हनुमन्तं च वेगवन्तं दुरासदम् ।
राक्षसानां च सन्नादं दृष्ट्वा वानरयूथपः ॥ 40

स्थूणेनायसघोरेण मर्दयामास राक्षसान् ।
सोर्थयामाच्च तान्हत्वा पिण्डीकृत्य च राक्षसान् ॥ 41

अन्तः प्रविश्य संहृष्टो भद्रकालीमुवाच च ।
ईश्वरीं शिवरूपीं तां सर्वालङ्कारशोभिनीम् ॥ 42

स्तुत्वा विविधैस्तोत्रैरर्चयामास मारुतिः ।
शिवरूपी महामाये रामं दर्शय मां शिवे ॥ 43

देवदेवौ राजपुत्रौ वरदे मम दर्शय ।
सर्वैश्वर्यप्रदे देवि रामं दर्शय सत्वरम् ॥ 44

सर्वभोगप्रदे दक्षे सर्वमङ्गलदायिनी ।
सर्वमन्त्रार्थनिवहे सर्वसाम्राज्यदायिनी ॥ 45

इष्वाकुप्रवरौ रम्यौ लोकनाथौ च दर्शय ।
एवमादि शुभैर्वाक्यैर्वायुसूनुरयाचत ॥ 46

तदा देवि प्रसन्नात्मा सर्वशक्त्यात्मिका तदा ।
प्रादुर्बभूव देवेशी सर्वालङ्कारभूषणा ॥ 47

सर्वायुधधरा देवी अष्टादशभुजोद्धृता ।
स्फुरत्किरीटकेयूरकटकाङ्कित भूषणा ॥ 48

हनुमन्तमथोवाच देवी सर्वाङ्गसुन्दरी ।
त्वां जाने रामभक्तेति दर्शयिष्यामि तावहम् ॥ 49

मैरावणेन निहितां पेटिकां विधिनिर्मिताम् ।
अहं ज्ञात्वा हृदि न्यस्ये लोकनाथौ शिवांशजौ ॥ 50

हृदये स्थापयित्वाहं दौरात्म्यात् राक्षसस्तदा ।
त्वया नाशं समायाति यतो मतिमतां वरे ॥ 51

पेटिकान्निद्रितौ पश्यन् हृदिस्थौ रामलक्ष्मणौ ।
दृष्टा त्वं राक्षसं हत्वा पुनर्गत्वा ममान्तिकम् ॥ 52

आदाय पेटिकां क्षिप्रं गच्छ वानरपुङ्गव ।
इति सन्दर्शयामास सादरं रामलक्ष्मणौ ॥ 53

दृष्ट्वा हनुमान् हृष्टात्मा नष्टलाभो धनं यथा ।
आनन्दार्णवमग्नोसौ पुलकाङ्कित विग्रहः ॥ 54

देवीं नत्वा भद्रकालीं युद्धाय पुनरागमत् ।
प्राकारं पुप्लुवेन्यच्च हिरण्मयविराजितम् ॥ 55

मणिस्तम्भशतो पातं तोरणं च बभञ्ज च ।
शततालसमुच्छ्रेयं प्रासादं हेमपाण्डरम् ॥ 56

तं च तद् ध्वंसयामास अपरं हर्म्यमाययौ ।
पातयित्वा तु पातेन तत्रस्थान् जघ्निवान् पुनः ॥ 57

सिंहनादं चकारोच्चैर्गर्जने मेघराडिव ।
वार्षिकेष्विव जीमूता यथा गार्जन्ति भीकराः ॥ 58

तथा वायुसुतो गर्जन् सञ्चचार गृहोपरि ॥ 59

प्रलयानिलसन्निभनिःस्वनं-
सन्निशम्यकदातु(तदानु?)मिति श्रुतेः ।
अतिकोपपरीतचेतनो
विपरीतेव नवग्रहाधिपाः ॥ 60

इति श्रीमज्जैमिनीभारते मारुतिमैरावणचरित्रे
द्वादशोऽध्यायः ।

त्रयोदशोऽध्यायः

मैरावणो भृशं क्रुद्धो स्थानान्निर्गत्यभीकरः ।
कोऽयं गर्जति भीत्कारं समुद्र इव पर्वणि ॥ 1

अत्रान्तरे महाशूरा हतशिष्टाश्च राक्षसाः ।
क्षरन्तो रुधिरान् देहात् सोष्णं फेनं च मुञ्चतम् ॥ 2

द्रुतमागत्य दूतास्ते मैरावणमथाब्रुवन् ।
नमो राक्षसनाथाय ब्रह्मदण्डसुताय ते ॥ 3

श्रुणु ! वाचं महाघोरं अस्मान्वीक्षस्व सत्वरम् ।
वानरः कश्चिदागत्य पद्मनालान्महाबलः ॥ 4

पातयित्वा तुलाद्धारं तत्रत्यान्वि निहत्य च ।
कालिकोष्ठं समासाद्य रामपेटीं सगृह्य च ॥ 5

देवीं निर्भत्स्र्य कोपेन प्रासादं च निपातयत् ।
कांस्यकार्षाय वप्रास्ते ध्वंसितः प्रवराहताः ॥ 6

दूतानां वचनं श्रुत्वा कोपात्कोपेन संयुत ।
हस्ते हस्तं प्रपीड्याथ दन्तान् कटकटाप्य च ॥ 7

कोपाविष्टो महद्धोरं प्रलयानिलसन्निभः ।
उद्दण्डभैरवाकारः प्रलयान्तकसन्निभः ॥ 8

आस्थानमण्डपं प्राप्य प्रेतराडिव दुर्जयः ।
चारानुवाच हे रक्षाः सामात्या मम सर्वशः ॥ 9

आकर्षयध्वं विस्रब्धाः कार्यं हि महदुद्यतम् ।
शीघ्रमादाय गन्तव्यं पुनस्त्वरितविक्रमाः ॥ 10

अमात्यनयार्थे ते चारा आगत्य सत्वरम् ।
उचुर्मन्त्रिवरान्सर्वान् राजा वो द्रष्टुमिच्छति ॥ 11

शीघ्रं गन्तव्यमित्येव त्वरया राजशासनात् ।
इत्युक्त्वा मन्त्रिमुख्यास्ते गृहान्निर्गत्य सत्वरम् ॥ 12

चतुरङ्गबलोपेतं निर्जग्मुः कालचोदिताः ।
मेघरावो चमूहस्तु सूचीमुखशुनामुखौ ॥ 13

घटनासीरकुनेत्रौ शूर्पकर्णौ द्विशीर्षवान् ।
भयङ्करः कालभेदी भेद्यानादी अजामुखः ॥ 14

निर्जरान्तर ऊर्ध्वास्यो वृकास्यो वक्रनेत्रकः ।
शार्दूलदंष्ट्रो गण्डोष्ठो सिंहकेतन एव च ॥ 15

विजयोष्ट्रमुखोद्दण्डस्सूकराननदन्तुरः ।
करिहस्तो गजशिरः कालजिह्वो मदोत्कटः ॥ 16

सर्पास्यो सूकरास्यश्च दीर्घदन्तो बलायुधः ।
मेघमाली महामाली उन्मत्तो ह्यतिविक्रमः ॥ 17

दीर्घपादो तालजङ्घो उष्ट्रास्योथ वृकोदरः ।
वज्रकोपोनलास्योथ दण्डनेत्रो प्रहोदरः ॥ 18

ध्वजग्रीवो मल्लयोधी दुर्दण्डादि महाबलाः ।
राज्ञस्समीपमासाद्य रावणं च ववन्दिरे ॥ 19

राजन् राक्षसशार्दूल वयं किं करवाम ते ।
त्रिषु लोकेषु यः कश्चित् तव नास्ति समो बले ॥ 20

आनाययितवानस्मान् किं कार्यं तव चोद्गतम् ।
इन्द्रो वा त्रिपुरारिर्वा तु विष्णोर्वा त्वामसम्भवात् ॥ 21

त्वत्तो विकटयित्वा तु कस्तिष्ठति महीतले ।
तं शत्रुं वद विस्रब्धं नाशयिष्यामहे चिरात् ॥ 22

ब्रह्माण्डभैरवं वापि बडबानिलभैरवम् ।
आकाशभैरवं वापि बडबाग्निमथापि वा ॥ 23

गृहीत्वा मुष्टिघातेन घटयिष्यामहेचिरात् ।
सतेषां वचनं श्रुत्वा तानुवाच महाबलान् ॥ 24

दशरथ कुलोत्पन्नौ गृहीत्वाहं प्रवेशितम् ।
प्रातर्बलिं हनिष्यामि इति निश्चित्य निस्सृतः ॥ 25

हनुमानिति विख्यातो वायुसूनुर्महाबलः ।
मार्गयित्वा पद्मनालं प्रविश्यायं महाकपिः ॥ 26

तुलाबन्धं तोरणं च प्रासादं हेमपाण्डरम् ।
पातयित्वा च सर्वाणि दुर्गान्निर्गत्य वानरः ॥ 27

रामपेटिं पुनर्लब्ध्वा हिंसितो राक्षसान् बहून् ।
तदर्थे प्रेषयं युष्मान् यूयं गत्वा गृहीष्यथ ॥ 28

इति सत्कृत्य तान्सर्वान् विससर्ज च राक्षसः ।
ते मन्त्रिप्रवरास्सर्वे राक्षसाकूटयोधिनः ॥ 29

स्वं स्वं बलं समादाय गजाश्वरथसङ्कुलम् ।
पदादिभिः परिवृतां सन्नद्धाः कवचा युधि ॥ 30

प्रासासि परिघैर्घोरैः शतघ्नीभिः परश्वथैः ।
कुन्तैर्मुद्गरदण्डैश्च चक्रैः कङ्कालशस्त्रकैः ॥ 31

क्रकचैर्लगुडैश्चैव नाराचैश्शङ्कुकण्टकैः ।
अङ्कुशैर्वरदण्डैश्च पाशासि युगदण्डकैः ॥ 32

अष्टादशविशेषैश्च *आयुधैस्सहितापयुः ।
कोटीनां राक्षसानां च सार्धं लक्षैस्समावृतः ॥ 33

राक्षसैर्विविधाकारैः आवृतो मेघरावकः ।
अभ्यगच्छन्हनूमन्तं पूर्वभागे महाबलः ॥ 34

चतुष्कोटिशतैः सार्धं अष्टहस्तस्समाययौ ।
दशकोटि भटैस्सार्धं मुखसूची समाययौ ॥ 35

राक्षसैः पञ्चकोटीभिः वृतो शुनमुखो ययौ ।
घटासी च लक्ष कोटीशैः राक्षसैः संवृतोभ्ययात् ॥ 36

कोटिभिस्तिसृभिस्सार्धं रक्तनेत्रस्समाप्य च ।
एवं षडानना भूत्वा षडयूथा महाबलाः ॥ 37

हनुमन्तं समीक्ष्याथ कालदण्डमिवस्थितम् ।
महाकायःमहासत्वो षडैते राक्षसाधमाः ॥ 38

* See Vihagendra samhita - Vol. I. P. No. 99-102, T.M.S.S.M. Library Publication, Thanjavur.

निर्वीर्य राक्षसास्सर्वे दृष्टमात्रेण वानरम् ।
प्रचण्डानिलमासाद्य आसन्मेघा इवाभ्रके ॥ 39

स्वप्रतिज्ञां दृढीकर्तुं कपिमासाद्य राक्षसाः ।
बाणैः प्रजघ्नुस्ते सर्वे शूलैर्जघ्नुस्तथापरे ॥ 40

प्रहरश्छक्तिभिः केचिद्धनूयन्तमतन्द्रिताः ।
प्रहरन्तिस्म मुसलैः केचिद्बाणैः प्रबोधिरे(प्रभेदिरे?) ॥ 41

सर्वकालायसैश्शूलैर्निजघ्नुस्सत्वरं कपिम् ।
रथैरन्यैगजैरन्यैप्यश्वैरन्ये समारुहान् ॥ 42

सिंहैर्व्याघ्रैश्च भल्लूकैर्मकरैस्सर्पवृश्चिकैः ।
लुलायैः कुक्कुटैश्चापि कुत्सितैर्वाहनैर्युताः ॥ 43

त्रिवक्त्रधनुरादाय ज्यां योज्यं भृशमहावे (माहवे?) ।
शतेन लाघवेनाष्टौ निजघान कपेस्तनुम् ॥ 44

मेघरावो पुनस्सप्तशतेन च समर्पयत् ।
अष्टहस्तोष्टसाहस्रैर्बाणैराघट्टयत् बली ॥ 45

सूचीमुखोऽथ नाराचैनिर्बिभेदस्तनान्तरे ।
श्वामुखो दशशूलेन हनूमन्तमताडयत् ॥ 46

घटनासी शतार्धेन प्राहरन्मूर्ध्नि वानरम् ।
रक्तनेत्रो नवशतैस्त्रोटयामास कार्पटैः ॥ 47

सर्वैप्रहरणैश्चापि राक्षसा सर्व एव ते ।
मण्डलीकृत्य सर्वे ते जगर्जुः कालचोदिताः ॥ 48

रामदूतोऽथ तान्वीक्ष्य सर्वान्राक्षसवल्लभान् ।
मण्डलीकृतकान् घोरान् नानायुधविमोचकान् ॥ 49

प्रवरान् भटयोधांश्च दृष्ट्वा निर्भयमानसः ।
तुलालक्षसहस्रेण आयसेन कृतं महत् ॥ 50

देवासुरैरचलन्मण्डनार्थं चनिर्मितम् ।
ब्रह्मणा दण्डनार्थं च सर्वराक्षसपेषणे ॥ 51

घटिका पञ्चको न्नित्यं स्थूलं च घटिकायुतम् ।
स्तम्भमुत्पाटयामास सर्वराक्षसहेतवे ॥ 52

दृष्टिभ्यां चारयामास जगर्ज च महाबली ।
आकाशे भ्रामयित्वा तु राक्षसेषु बिलेषु च ॥ 53

पुच्छमुद्यम्य वेगेन वेष्टयित्वा च कन्धरान् ।
पञ्चाशल्लक्षरक्षांसि आकाशे भ्रामयन्मृशम् ॥ 54

भ्रमणात्ते महाकाया राक्षसाविगतासवः ।
व्योम्निमार्गाद्धिकीर्यन्त लेलिशा(हा?)वायसा भुवि ॥ 55

उग्रवेगेन चागत्य हनूमान्मारुतात्मजः ।
सिंहनादं महश्चक्रे स्तम्भं धृत्वा करेण च ॥ 56

तत् सिंहनादघोषेण दम्भोलि निनदा इव ।
बन्धीकृता श्रोतृपुटामूर्च्छालक्ष्म अवापतुः ॥ 57

हनूमता वेगवता स्तम्भेन विनिपातिताः ।
राक्षसादशकोट्यश्च विभिन्नशिरसा पतन् ॥ 58

पुप्लुवे वायुजः पश्चात् राक्षसेषु समन्ततः ।
द्रावयामास तान् सर्वान् घोरान् राक्षसपुङ्गवान् ॥ 59

स्तम्भेन लोलयित्वा तु बहून्निन्येयमक्षयम् ।
चतुर्विंशति कोट्यश्च राक्षसामदगर्विताः ॥ 60

हनुमन्तं बलिं प्राप्य यमलोकं व्रजन्ति ते ।
हनुमान् पुनरुत्थाय गजाश्वरथपत्तिषु ॥ 61

निपात्य स्थूणघातेन तूर्णयामास मारुतिः ।
अश्वानुष्ट्रान् गजान् वाहान्योधान्नत्वा महाकपिः ॥ 62

षट्पदीन् गन्तुकामोऽथ षण्मुखाधिपतीन्मुहुः ।
स्तम्भं भृशं भ्रामयित्वा मेघरावस्य मूर्धनि ॥ 63

प्रजघान पुनस्त्वन्यमष्टौहस्तमपातयत् ।
श्वामुखं घटनासं च सूचीमुखसुनेत्रकम् ॥ 64

एकेन प्रहरेणाथ प्रपपात धरातले ॥ 65

स्तम्भप्रहारेण विशीर्णदेहा
सवाहनास्सायुध यूथवर्गाः ।
षडाधिपा षष्ठमुखेन पूर्व-
सतारको जीर्ण इवाभवंस्ते ॥ 66

इति जैमिनीभारते मारुतिमैरावणचरित्रे
त्रयोदशोऽध्यायः ।

चतुर्दशोऽध्यायः

अगस्त्यः –

षष्ठवर्गान् स तान् दृष्ट्वा वानरेण महात्मना ।
कोपेने परिपूतास्ते ते षोढाःबलनायकाः ॥ 1

शूर्पकर्णो द्विशीर्षा च कालभेदी भयङ्करः ।
अजोमुखो भेकनादी ऊर्ध्वास्यो निर्जरान्तकः ॥ 2

वृकास्यो वक्रनेत्रश्च गण्डोष्ठस्सिंहकेतनः ।
शार्दूलदंष्ट्रो विजयः उद्दण्डोष्ट्रमुखस्तदा ॥ 3

एते च षोडापतयः मैरावणहिताश्च ये ।
कोटिकोटिभटैस्सार्धं गजाश्वरथवृन्दकैः ॥ 4

रणभेरीसमाहत्य निर्जग्मुः कालचोदिताः ।
वाहनैर्विविधैस्ते तु बहुरूप भयावहैः ॥ 5

रथारूढा महाकाया नीलमेघसमप्रभाः ।
षोढा दयादुराधर्षास्सर्वायुध धनुर्धराः ॥ 6

चन्द्राक‍ौ कबलीकर्तुमायान्तमिव चाम्बरे ।
सन्त्रस्ता मारुतिं दृष्ट्वा कालोऽयमिति निश्चिताः ॥ 7

अस्मान् संहर्तुमुद्युक्तः काल एव न संशयः ।
इति सञ्चिन्त्य ते सर्वे मोहिता राक्षसाधमाः ॥ 8

पतङ्गाग्निमिवासाद्य भक्षणार्थे यथागताः ।
तथागत्य हनूमन्तं कोशादुत्कृत्य चायुधान् ॥ 9

पृथक् पृथक् च प्रायुङ्क्ते स्वैः स्वैः प्रहरणैस्तथा ।
हनूमन्तमथावीक्ष्य सर्पास्योपि ज्वलन्निव ॥ 10

सर्पाकृतीन् शितान् बाणान् सप्तमारुतिमम्बरे ।
तं दृष्ट्वा सहसोत्पत्य सर्पहस्तं दुरासदम् ॥ 11

तस्योपरि पतत्तूर्णं निष्पिपेष च राक्षसम् ।
श्रोत्रास्यादुद्वमन् नृत्तं ममार च स राक्षसः ॥ 12

मृतं वीक्ष्य च सर्पास्यं षोढापत्यश्च राक्षसाः ।
बाणवर्षं विमुञ्चन्तः पर्वते मेघराडिव ॥ 13

नाराचैर्वत्स दन्तैस्च वक्त्रैरञ्जलिकैरपि ।
शिलीमुखैर्विपाठैश्च हनूमन्तं ववर्षिरे ॥ 14

एकेन द्वौ त्रिभिश्चैव पञ्चभिषड्भिरेव च ।
दशेन शतबाणेन ताडयाञ्चक्रिरे तदा ॥ 15

शूलैर्मुद्गरदण्डैश्च शतघ्नीभिश्च मर्दयन् ।
ते सर्वे बाणजालैश्च हनुमन्तं विजघ्निरे ॥ 16

कार्ष्णीभूतं तनुःसृष्ट्वा दलिता लुलिता च ताः ।
विदलाभग्निकाचूर्णं पेतुरुर्व्यां तृणीकृताः ॥ 17

ते सर्वे राक्षसा योधा षोढाः कुपितमानसाः ।
अशत्यमायुधैर्हन्तुमिति मत्वा स राक्षसाः ॥ 18

त्वष्टुरस्त्रेण सञ्जघ्नुर्हनुमन्तं रणोत्कटम् ।
तदस्त्रमन्यथा कृत्वा प्रविवेश बिलोदरे ॥ 19

शूर्पकर्णस्य शिरसि मुष्टिना घट्टयत्तदा ।
शिरः कपाल मेदिन्यां गतासुरपतद्भृशम् ॥ 20

द्विशीर्ष गण्डपार्श्वे तु पादेन ताडयद्भृशम् ।
मुष्टितो न्यपतद्भूमौ विललाप ममार च ॥ 21

भयङ्करं कालभेदी तृणेन ववृधे मुहुः ।
ऊर्ध्वास्यं भेकनादं च जानुभ्यां पातयद्भुवि ॥ 22

वृकास्यं वक्रनेत्रं च अरत्नीवर्तनं दधत् ।
अजोमुखं तलेनाथ हत्वा वानरपुङ्गवः ॥ 23

निर्जरान्तकमासाद्य स्थूणेन प्रजघान च ।
शार्दूलदंष्ट्रं गण्डोष्ठं सिंहकेतनमेव च ॥ 24

त्रयाणामेकतः प्राशुविजयोष्ट्रमुखं तदा ।
उददण्डं मुष्टिना हत्वा स्तम्भै रुर्व्यां न्यपातयत् ॥ 25

ते षोढा मन्त्रिवर्यास्ते निहता विगतासवाः ।
भिन्नदेहा भिन्नशिरा भिन्नगन्डोष्टतालुकाः ॥ 26

निपेतुर्धरणीं प्राप्ताः क्षणेन कपिना तदा ।
आञ्जनेयोथ संरम्भात् हत्वा षोढान् बलाधिकान् ॥ 27

भटाननुचरान्हन्तुं विचचार स रक्षसि ।
बृहस्तम्भं समादाय भ्रममाणः पुनः पुनः ॥ 28

षोढानां रक्षकोटीनां संवर्ताग्नि रिवाज्वलन् ।
स्तम्भेन पातयाञ्चक्रे अयुतद्वियुतं तथा ॥ 29

वेगेन भ्ररमणैकेन अयुतं प्रयुतं हतान् ।
बाहुभ्रमणघोरेण षोढा कोटिं च राक्षसान् ॥ 30

हत्वा तेषां वाहनानि मृद्धा न भंक्त्वा स मारुतिः ।
पुनः प्राकारमगमत् स्तम्भं जग्राह पाणिना ॥ 31

षोढापतीन् षष्ठगणप्रमापितं–
तदा हरिं वीक्ष्य विघूर्णचेताः ।
लोकाधिपाराक्षसमुख्यवर्गाः
तं मारुतिं ते घटयाम्बभूव ॥ 32

तुरगखुराहतक्षितिज
धूलिरयस्थगिताम्बरसम्भृतास्ते ।
अधिकचमूगणनिर्भरा
भ्रमरमम्बरमेघगणा इवासन् ॥ 33

इति जैमिनीभारते मारुतिमैरावणचरित्रे
चतुर्दशोऽध्यायः ।

---- ❀ ----

पञ्चदशोऽध्यायः

अगस्त्यः –

जितवन्तं हनूमन्तं राक्षसाश्च चतुर्दश ।
अपश्यन् लोकमुख्यास्ते यथाकामविहारिणः ॥ 1

सुचक्रैः कुबरैः दण्डैः नीलैश्चरथगुप्तिभिः ।
सुयुक्तान् पतिभिःगुप्तान् घटकैश्चापि निर्मितान् ॥ 2

आप्तैस्सूतगणाभिस्तान् अभीशुकरसारितान् ।
रथानारुरुहस्सर्वे चतुर्दशघना इव ॥ 3

सन्नद्धाश्चित्रवर्माणि बिभ्रन्मारुतिमाययुः ।
दन्तुरो हनुमन्तं च बाणैष्षड्भिरताडयत् ॥ 4

पुनस्सप्तदशाष्टौ च उत्तमाङ्गेह्यपातयत् ।
पश्चाश्छतेन बाणेन व्यापारविदुषस्थले ॥ 5

तान्सर्वान् आयुधान्बाणान् बभञ्ज च स मारुतिः ।
महान्तशूलमुद्यम्य दन्तुरो वाक्यमब्रवीत् ॥ 6

प्राक्कृतान् राक्षसान्हत्वा कृतार्थ इति मन्यसे ।
निर्वीर्याणां वधे लोके कुत्सितं किल वानर ॥ 7

तस्मात्कुत्सितकर्माणं हनिष्यामि न संशयः ।
मत्भुजेशूलमत्युग्रं त्वयि वानरपुङ्गव ॥ 8

त्वया तमन्यथाकर्तुमशक्यमिति भाति मे ।
इत्युक्त्वा शूलमादाय अष्टपन्दमथोऽनयत् ॥ 9

दन्तुरेण विनिर्मुक्तं तच्छूलं ज्वलनप्रभम् ।
आकाशाच्च समायान्तं दृष्ट्वा वानरपुङ्गवः ॥ 10

उत्प्लुत्य वेगाज्जग्राह तच्छूलं शङ्करो यथा ।
विससर्ज तमुद्दिश्य दन्तुरं राक्षसाधमम् ॥ 11

शूलेन विनिकृत्ताङ्गो दावादग्ध इव द्रुमः ।
पपात भुविभागे च पाताले विगतासु च ॥ 12

तं दृष्ट्वा निहतं रक्षो राक्षसाः पिशिताशनाः ।
त्रयोदशास्समागत्य हनुमन्तजिघांसया ॥ 13

मुद्गरे भिण्डिपालैश्च शतघ्नीभिश्च ताडयन् ।
भृशुण्डिः परिघैश्चापि युगदण्डैश्च ताडयन् ॥ 14

शरवर्षाणि मुञ्चन्तः पुष्करागगने यथा ।
निरन्तरं निराकाशमापुपूरे सुसायकैः ॥ 15

सतेषां बाणजालानि वृक्षमारुह्य वेगवान् ।
भ्रामयित्वा स तान्जघ्नन् सर्पराक्षसपुङ्गवान् ॥ 16

वृक्षेण लक्षरक्षांसि शिरांसि विनिपाति यत् ।
महान्तं शैलमुत्पाद्य निर्जरान्तकमूर्धनि ॥ 17

निपातयत्ततो वेगात् सालमुत्पाट्य वानरः ।
करिहस्तं गजशिरं दुर्दण्डं मल्लयोधिनम् ॥ 18

विनिहत्य च तेनाजौ प्रहसन्निव मारुतिः ।
अनलास्यं ध्वजग्रीं पुच्छेनाकृष्य वेगवान् ॥ 19

आकाशे भ्रामयामास तौ चोभौ राक्षसाधमौ ।
दण्डनेत्रो वज्रकोपो उष्ट्रास्योऽथ वृकोदरः ॥ 20

चत्वारः पर्वतं गृह्य हनूमन्तमताडयन् ।
हनुमानपि तेजस्वी अयस्तम्भाद्व्यपोहयत् ॥ 21

वामहस्तेन जग्राह चतुरश्च ....*रो बली ।
भ्रामयित्वा च वेगेन यमस्थानमथानयत् ॥ 22

मदोत्कटस्सूकरास्यः कालजिह्वो बलायुधः ।
दीर्घदन्तो मेघमाली महामाली च राक्षसाः ॥ 23

सप्तैते राक्षसाश्शूराः आमूलदलनायकाः ।
सप्तकोटिभटैस्सार्धं हनुमन्तं प्रजघ्निरे ॥ 24

सर्वप्रहरणैर्घोरैः पीडयन्नासतुःकपिम् ।
सप्तमन्त्रिवरान्योन्यान् वेगेनासाद्य मारुतिः ॥ 25

शिलां गुर्वीं समुत्पाट्य विससर्ज च तान्प्रति ।
शिलानिष्पिष्टदेहास्ते विशवास्सप्तराक्षसाः ॥ 26

---

* XXXXXX

पुनः कोपातिभूतोभूत् जितकाशी स मारुतिः ।
राक्षसान्मर्दयामास स्तम्भेन कठिनेन सः ॥ 27

स्तम्भेनैकेन वारेण प्रहारेण हतायुताः ।
काष्ठायां पादघातेन पातयन् राक्षसान्वहून् ॥ 28

त्रिसाहस्रं कलायां घ्नन् क्षणेन नवतींस्तथा ।
दशलक्षसहस्राणि अशीति पिशिताशनाः ॥ 29

मुहूर्तेन हतास्तेन वेगेन च हनूमता ।
छिन्नहस्ताः भिन्नशिराः क्लिन्नरक्ताश्च मज्जकाः ॥ 30

भग्नां त्रिसन्धि बहुला भग्नास्थीनि कलेबराः ।
निष्पिष्टा राक्षसा भूमौ यामार्धेन निपातिताः ॥ 31

हतशिष्टाश्शतान्यासन् कोट्यः च च(चा?)तुर्दशा प्रभो ।
ध्यानमूकत्वमापन्नाश्शिष्टा मैरावणं गताः ॥ 32

लज्जया परिवृत्ताङ्गो ह्युत्तिष्ठन्तं तदन्तिके ।
सतान् शिष्टान् सनिर्भत्स्र्य स्वयं स्यन्दनमास्थितः ॥ 33

चतुस्सादि(स्सेना ?)समायुक्तं शतघोटकसंयुतम् ।
रथगुप्ति समोपेतं किङ्किणीशतशोभितम् ॥ 34

माया कर्बुरितं शत्रुं माणिक्यमयदण्डकम् ।
रत्नकूबरसंस्थानं रुक्मचक्रभ्रमापणम् ॥ 35

सिंहध्वजं वज्रकूटं हेमश्रृङ्गसमाचितम् ।
मायाक्रित्रिमरत्नाढ्यं सर्वायुधधरं हरम् ॥ 36

रथार्ककिरणाभासं वैश्वानरसमप्रभम् ।
चतुस्तालघनोन्नत्या षोढा चक्रगुणावृतम् ॥ 37

कालमेघनिभाकारैः राक्षसैः परिवारितम् ।
आरुरोह रथं दिव्यं सिंहराडिव पर्वते ॥ 38

रथस्थश्शुशुभे रक्षस्सेनाबिन्दुरिव प्रभो ।
भेरीमाहत्य पृथुलां वन्दिभिश्चापि संस्तुतः ॥ 39

स्वाल्पपरिवारेण वाद्यघोषेण संयुतः ।
आस्थानाच्चलितः पापैः वाद्यघोषैर्घनागमे ॥ 40

स्फुरत्किरीटकेयूरकटिसूत्रविराजितः ।
गण्डशैलप्रतीकाशशिरोष्णीशप्रकाशितः ॥ 41

युगान्तर इवोत्पातपवनप्रेरितो गिरिः ।
कालजीमूतसङ्काशसकालमहिषोपमः ॥ 42

ब्रह्मदण्डसुतोद्दण्डः कालदण्ड इवापरः ।
रथे भाति लुलायस्थः प्रेतराडिव दुर्जयः ॥ 43

रक्षो वानरमुख्यस्य समीपमुपसर्पति ।
वात्यवातो महानासीद्वामं चक्षुरकंपत ॥ 44

अचलद्धामहं स्तोत्रं अकस्मादश्रुजायते ।
स्वरो हीनतरो ह्यासीत् गगनाद्रक्तबिन्दवः ॥ 45

उल्काकबन्धसङ्काशश्च रथादग्रे निपेततुः ।
एतादृशान् दुःखकरान् शकुनान्वीक्ष्य रावणः ॥ 46

अनादृत्य च तान् घोरान् वानरान्तिकमाययौ ।
घोरमौत्पातिकं दृष्ट्वा जयेयमिति निश्चितः ॥ 47

हनूमन्तं रणश्लाघ्यं दण्डहस्त इवान्तकः ।
आसाद्य घोरसङ्काशं प्रेरयन् बाणजालिकान् ॥ 48

नाराचान् पीठकानुग्रान् तोमरान्वानरे सृजन् ।
समीपमासाद्य कपेः खड्गवर्षमपातयत् ॥ 49

विकिरच्छूलवर्षाणि शक्तिवर्षाणि मुञ्चत ।
अशङ्कमचलं दक्षमक्षोन्मीलित लोचनम् ॥ 50

निर्भयं वानरं वीक्ष्य ताडितं च सुपत्रिभिः ।
वीक्ष्य रक्षो भृशं क्रीडो असृजश्छतमौसलम् ॥ 51

शतानि मुसलान्यस्मिन्विसृज्य चरणे बली ।
विधाता वज्रसारेण वानरं निर्ममे ध्रुवम् ॥ 52

अस्मदर्थेति निश्चित्य कोपाटोपाश्च तं कपिम् ।
शतघ्नीनां सहस्रेण पीडयामास मारुतिम् ॥ 53

प्रकोष्टेन च तान् त्रुटयत् सिंहनादं चकार ह ।
मैरावणमथो वीक्ष्य किञ्चिद्विस्मितमानसः ॥ 54

रथस्थं सुभृशं कुद्धं सर्वभूषणशोभितम् ।
सर्वायुधधरं शूरं सम्यग्दृष्ट्वा स मारुतिः ॥ 55

उद्दण्डभैरवाकारं कालरुद्रमिवागतम् ।
दृष्ट्वा मैरावणं तत्र दिष्ट्यादृष्टं मया हितः ॥ 56

करस्थं भ्रामयामास स्तम्भं हेमपरिष्कृतम् ।
सहसोत्पत्य वेगेन न्यपतद्रथरोधसि ॥ 57

अश्वानपातयच्छीघ्रं शतान् रथनिबन्धकान् ।
पुनरुद्धृत्य तूर्णेन व्यपोहयत सारथीन् ॥ 58

ध्वजं बभञ्ज वेगेन रथं पादेन पातयन् ।
जगर्ज च भृशं हृष्टो तलेन प्रजघानतम् ॥ 59

किरीटं वामहस्तेन पातयामास भूतले ।
मैरावणस्य कण्ठे तु वालं संवेष्ट्य मारुतिः ॥ 60

आकाशे भ्रामयित्वा तं गोपुरे प्रजघान च ।
ततो मैरावणः क्रुद्धो नागरूपमवाप च ॥ 61

मैनाकमन्दराकारो कपिमासादयद्रणे ॥ 62

मेरुमन्दरसमानदेहवान्–
श्रृङ्गवन्तमिव सम्भृतोन्नतः ।
अन्तकान्तकमिव प्रकोपितं
बुद्धिमन्तमनुमन्तमाप च ॥ 63

इति जैमिनीभारते मारुतिमैरावणचरित्रे
पञ्चदशोऽध्यायः ।

षोडशोऽध्यायः

अगत्यः –

शैलभूतं तु संवेष्ट्य वानरो राक्षसेश्वरम् ।
वज्रप्रतिमसारेण वालेनाच्छाद्य तन्नगम् ॥ 1

संवेष्ट्य सुभृशं वेगात् चिक्षेप च ननाद च ।
शैलसंक्षेपणाद्दूरं शकलीकृतविग्रहः ॥ 2

पुनरुत्थाय नगरात् साश्वसूतरथध्वजः ।
सर्वायुधसमायुक्तो वानरश्चायुधैः किरन् ॥ 3

उवाच मारुतिं वीक्ष्य तिष्ठशूरोऽसि मा व्रज ।
क्षणेन त्वां हनिष्यामि स्थिरोभव महाकपे ॥ 4

नविद्दसत्वं च पलः(निपथ दुर्बुद्धे त्वां ?) निन्र्येयमसादनम् ।
इतीव गर्जितं कर्तुं मन्यो वासव एव वा ॥ 5

शङ्कामगमदत्यन्तं मारुतिर्बलिनां वरः ।
वृथा कपित्थसे रक्ष न शूरस्त्वं हि दुर्मते ॥ 6

चोरयित्वा राजपुत्रौ जीवेयमिति तिष्ठसि ।
मम चक्षुपथं प्राप्य कुत्रगन्तुं न शक्यते ॥ 7

त्वां हन्तास्मि न सन्देहः सर्वलोकगतादपि ।
इत्युक्त्वा सहसोत्थाय द्रुमं शाखादलैर्युतम् ॥ 8

पाटयित्वा करेणाथ विससर्ज च राक्षसि ।
तद्वृक्षं वायुजोत्सृष्टं शाल्तेन नतपर्वणा ॥ 9

निचकर्त शतं भागं बाणैरेव ददन्तरे ।
अथान्यं गन्डशैलं च करेणादाय मारुतिः ॥ 10

रथमुद्दिश्य चिक्षेप भ्रामयित्वा महाकपे ।
वज्राशनि समस्पर्शैर्बाणैर्दशसहस्रधा ॥ 11

निचकर्त पुनस्तूर्णीं सहस्रेण निपातयत् ।
ततं पराक्रमिणं दृष्ट्वा सालमारुह्य वेगतः ॥ 12

शिरसि प्रजघानोग्रैर्बाणैस्तदपि पातितम् ।
भृशं चुकोप हनुमान् राक्षसस्य वनं मुहुः ॥ 13

दृष्ट्वा वनात्समुत्पाट्य विससर्ज च तं प्रति ।
लघुवेगेन महता वृक्षवर्षमपातयत् ॥ 14

चूतवर्षं वर्षयित्वा रसालं वकुलं तथा ।
लोध्रवर्षं करञ्जं च पूगनालीकदम्बकम् ॥ 15

रजोवर्षं शिलावर्षं गजपाषाणवर्षणम् ।
निमेषाददशकोटीनां वृक्षवर्षमपातयन् ॥ 16

अवच्छिन्नानि वर्षाणि दृष्ट्वा विस्मितमानसः ।
भग्नायुधो भग्नरथो भग्नाश्वो भग्नसारथिः ॥ 17

शुध्यद्यतो दृष्टदेहो तूष्णीमास्ते जडा इव ॥ 18

सवृक्षवर्षं बहुधा निपात्य-
रक्षश्शिरस्थानतलाच्च ताडितः ।
तद्वृक्षशुध्योपरिचित्रितेव
पुष्पैः फलैःकृत्तिमतां चकार ॥ 19

मैरावणोपि दुष्टात्मा रथमन्यं समाश्रितः ।
प्रासासि (द?) परिघोपेतं युगशूलैरधिष्ठितम् ॥ 20

सर्वायुधैश्च सम्पूर्णं रथमारुह्य सत्वरम् ।
महताबाणवर्षेण हनुमन्तमवर्षयत् ॥ 21

मद्बलं त्वं न जानीषे दुर्बलो बलिनं यथा ।
यथागतं व्रजच्छीघ्रं ध्रुवं त्वं विसृजाम्यहम् ॥ 22

प्राणानपोहितुं बुद्धिर्यदि स्यात् तद्धृथा भव ।
एवमुक्त्वा जहासोच्चैः खरगर्जनसन्निभम् ॥ 23

वानरं प्रति दुद्राव रथेनादित्य वर्जसा ।
सरथं राक्षसं पश्यद्धनुमान् केसरीसुतः ॥ 24

उत्पाटयित्वा शैलाग्रं भ्रममाणो विसर्ज च ।
सहस्रद्धारदण्डेन आयसेन विदारितः ॥ 25

विशीर्णं स तदालोक्य दुष्टदं सन्निगृह्य च ।
रथे विसर्ज मेधावी दलितं तदपि (स्वबलैः?) भुजैः ॥ 26

धिष्ण्याकारमयीं शैलीं नीलरत्नमयीं हरिः ।
आरुह्य वेगं चिक्षेप मैरावणरथं प्रति ॥ 27

शूलेनायुधजालेन शतखण्डमवाप्य च ।
शिलीमुखसहस्रेण बाह्वोरुरसि चार्पयत् ॥ 28

वत्स ! दन्तसहस्रेण ऊरुपार्स्वे समर्पयत् ।
तोत्रेण दशकेनापि बाहुमूले समर्पयत् ॥ 29

सर्पाकारकृतैर्बाणैः कण्ठभागे विसृज्य च ।
ननाद भृशमत्युग्रो वार्षिकेष्विव नीरदः ॥ 30

सतान् केसरिपुत्रोऽथ वालेन विदलीकृतः ।
दुद्रुवुः च स रोमाणि चकम्पे चञ्चलोपमः ॥ 31

कर्णौ निकृष्य संक्रुद्धः स्थूणमादाय सत्वरम् ।
रथे निपात्य सुदृढं सारथिं प्रजघान च ॥ 32

दन्ताभ्यां त्रोटयामास राक्षसस्य भुजं महत् ।
तं जघान तलेनाशु खड्गेन च परामृशत् ॥ 33

दक्षिणेन करेणाशु खड्गमाक्षिप्य हस्ततः ।
जलीकृत्य च तं खड्गं भुजमेकं निकृन्तयत् ॥ 34

सखड्गेन निहत्याश्वानायुधानथ खण्डयत् ।
मुद्गरं तूर्णमादाय वामहस्तेन निर्भयः ॥ 35

खड्गहस्तं हनुमन्तं प्रहार कठिनोरसि ।
मुद्गरश्शकलीभूत उरस्थलविघट्टनात् ॥ 36

उरःप्रस्फोटरत्नेन मज्जया चाभवत्तदा ।
ईषच्छेदनया युक्तः केसरिप्रियनन्दनः ॥ 37

अच्छिनत् खडगधारेण कण्ठनालादिवाम्बुजम् ।
तुण्डं च खण्डयामास चण्डकोपेन संयुतः ॥ 38

रथं च शकलीकृत्य हतं निश्चित्य मारुतिः ।
आप्लुत्य स्वर्णविद्यायामीषत्कार्यं मया कृतम् ॥ 39

इति चिन्तयतस्तस्य प्राणा आगत्य सत्वरम् ।
प्रसुप्त इव चोत्थाय सन्नद्धश्चारुविक्रमः ॥ 40

दृष्ट्वा मैरावणं तच्च किमेतदिति चिन्तयत् ।
अस्यां पुर्यामुभौ रक्षः मैरावणविसंज्ञया ॥ 41

रथमन्यं समास्थाय सर्पप्रहरणैर्युतः ॥ 42

रे रे वानर ! दुर्बुद्धे ! कुत्र गच्छसि सत्वरम् ।
तिष्ठ ! तिष्ठ ! क्षणं मात्रं वां निन्ये यमराज्यके ॥ 43

इति संवदतस्तस्य मारुतिर्भीमविक्रमः ।
दृष्ट्वा मैरावणं च किमेतदिति चिन्तयत् ॥ 44

अस्यां पुर्यां उभौ रक्षः मैरावणविसंज्ञया ।
न वेति च तवायस्मात् जीवितं पुनरागतम् ॥ 45

सञ्जीवकरणीचापि तथा संधानकरणी ।
सौवर्णकरणी चापि विशल्यकरणी च ताः ॥ 46

ध्रुवं तिष्ठन्ति तद्धस्ते अन्यथा किमु जीवनम् ।
इति सञ्चिन्त्य हनुमान् पुनर्युद्धाय सम्भृतः ॥ 47

स्तम्भमादाय हस्तेन धृतदण्डो यमो यथा ।
शुशुभे मेरुवक्त्रे तु पद्ममित्रोदये यथा ॥ 48

रोहिण्या शयनं प्राप्य यथा कुमुदबान्धवः ।
सा वर्णवेदिकां प्राप्य तथा मारुति राजते ॥ 49

इति वचनसुतो महानुभावः-
गुरुतरयत्नतया तदाभिहन्तुमिच्छन् ।
वनचर उडुराज सन्निभोभूद्-
दृढतरतूर्णधृतःकरेण दिव्यम् ॥ 50

इति जैमिनीभारते मारुतिमैरावणचरित्रे
षोडशोऽध्यायः ।

---- ----

सप्तदशोऽध्यायः

श्रीअगस्त्यः –

अथ मैरावणो विद्वान्मायाबलविशारदः ।
घोरं मुसलमादाय वानरं मर्दयदृढम् ॥ 1

मुसलं मुष्टिना भिद्य तलेन प्रहरच्च तम् ।
कन्दुवत् तं समुत्थाय असिना घातयच्च तम् ॥ 2

स तं उग्रेण तृणेन ताडयामास चोरसि ॥ 3

तृण प्रहाराच्च विशीर्ण देहो–
निपत्य भूमौ सुचिरं विसंज्ञः ।
स तं विसज्ञं गलखण्डनाय
मतिं दधाने पुनरुत्पपात ॥ 4

सोपप्लुत्य पुनर्वेगात् तिष्ठ! तिष्ठेति वानर ।
अभिद्रुत्य स वेगेन धारयन् शूलमोजसा ॥ 5

अंजनापुत्र ते प्राणान्मे दास्यति न संशयः ।
शूलनिर्भिन्न देहं त्वां पश्यन्ति विबुधा जनाः ॥ 6

इत्युक्त्वा विसृजच्छूलं भ्रामयित्वा जहास च ।
सोपप्लुत्य च वेगेन शूलं च ग्राह पाणिना ॥ 7

जान्वारोप्य च झटिति बभञ्ज च ननाद च ।
शूलभग्नं तथा दृष्ट्वा चुकोप भृशमञ्जसा ॥ 8

शक्तिं जग्राह वेगेन पट्टनद्धां विराजिताम् ।
शतनिष्कसमोपेतां कर्मणा परिनिष्ठिताम् ॥ 9

विषजिह्वां करालीं तां ससर्ज च उवाच ह।
कपे बालिशदुर्बुद्धे शक्तिस्त्वां च हनिष्यति ॥ 10

विरोधयति मां यो वा बलिं शक्तेः करोमि तम् ।
एवमुक्तस्तु हनुमान् शक्तिं हुं कृत्य वेगवान् ॥ 11

स्तम्भयामास तं शक्तिमन्तरे रघुनन्दन ।
मारुतेर्मन्त्रवेगेन स्तम्भिता शक्तिभूषिता ॥ 12

न चलत्येव तत्रैषा सर्पो मन्त्रबलादिव ।
रक्षो वीक्ष्य च तां शक्तिं स्तम्भितां वानरेण ताम् ॥ 13

स्तम्भनं मोचयामास वज्रमन्त्रेण राक्षसः ।
रौद्रमन्त्रेण हनुमान् आयान्तीं शक्तिमोजसा ॥ 14

भस्मीचकार तेजस्वी रौद्रदेहो महाबलः ।
शक्तिं भस्मीकृतां वीक्ष्य चुकोप वरमातुरः ॥ 15

गदां गुर्वीं महाघोरां देवैरपि दुरासदाम् ।
अतिसाराममोघां तां विसृजन् कोपपूरितः ॥ 16

गच्छ ! लोकं यमस्येति कपेर्बालिश सत्वरम् ।
विसृज्य च ननादोच्चैः पर्जन्य इव वार्षिके ॥ 17

सा गदा ह्युत्तमाङ्गे तु अपतद्वेगवत्तरम् ।
गदया ताडितस्तत्र ईषदागलितक्ष्मः ॥ 18

भुवं प्राप्य पुनस्संज्ञामुत्पद्य बलिनां वरः ।
तां तदा महतीं गृह्य रथमुद्दिश्य तोलयत् ॥ 19

तामापतन्तीं वेगेन वीक्ष्य राक्षसपुङ्गवः ।
लाघवात् पुप्लुवेन्यत्र दूरतो राक्षसाधमः ॥ 20

मर्दयन् सारथींश्चक्रे सर्वप्रहरणानि च ।
सा गदा चूर्णयामास तत्रस्थानपि च प्रभो ॥ 21

लाघवादुत्स्वपन्तं च वालेनाकृष्य राक्षसम् ।
आकाशे भ्रामयित्वा तु प्राहरच्च शिलातटे ॥ 22

प्रहारा झर्झरीताङ्गो भग्नास्थिचयमण्डलः ।
विकीर्णनयने घोरं वज्रेणेव महागिरिः ॥ 23

पपातोर्व्यां स पापात्मा विगतासुर्विदेहवान् ।
हतमिति निश्चित्य मनसा हनुमान्मारुतात्मजः ॥ 24

मतिमास्थाय गगने चले सप्तपदे तदा ।
पुनः प्राणसमायुक्तो राक्षसो भीषयन् भृशम् ॥ 25

मागच्छ ! तिष्ठ! तिष्ठेति घोषयंश्च पुनः पुनः ।
रथमन्यं समास्थाय अदृश्याञ्जनिकोऽभवत् ॥ 26

अदृश्यं रथमास्थाय अदृश्यश्शठभावनः ।
तीक्ष्णाग्रान् कर्णनाराचान् भल्लानञ्जलिपाटकान् ॥ 27

सृजन्वयाय कपये विविधा नृत्त भोजनान् ।
सुपर्वकस्सुतीक्ष्णाग्रैः कङ्कपत्रविराजितैः ॥ 28

मारुतेरुपरि क्रोधा अस्त्राणि आयुधानि षट् ।
विषलिप्तान् विकुण्ठाग्रान् मोचयामास राक्षसः ॥ 29

क्षुरप्रेणशतेनाशु निजघान स्तनान्तरे ।
अर्धचन्द्रेण षट्केन बाह्वोरुरसि तोलयत् ॥ 30

विविधैरायुधैः क्रूरैः वर्षन्तं कालमेघवत् ।
अदृश्य रूपं दुर्द्धर्षं अचिन्त्य बलपौरुषम् ॥ 31

दृष्ट्वा कोपसमायुक्तो ह्यदृश्यं मोचनाय वै ।
मन्त्राकर्षणिकां विद्यां परमन्त्रविमोचनीम् ॥ 32

पित्रोपदेशात् संलब्ध्वा सर्वादृश्यविलोळिनीम् ।
प्रायुङ्क्त दर्भमादाय अभिमन्त्र्य स मन्त्रितः ॥ 33

सदर्भोज्ज्वलनात् भूत्वा अदृश्यन्नाशयत्तदा ।
रथं च भस्मसात्कृत्वा अथ तानपि सर्वशः ॥ 34

अथ रक्षोग्ररूपेण सिंहरूपं समाभृतः ।
हनुमन्तं पृष्ठभागे अदंशच्च महाकपिम् ॥ 35

वामहस्तेन तं गृह्य भूतले निष्पिपेष च ।
विसृज्य रूपं वेगेन गज रूपं समाभृतः ॥ 36

अष्टश्रीगोह्यष्टकरः अष्टास्यमुखमण्डलः ।
आवृतो भीकरं रावं शुण्डाग्रं चालायन्मुहुः ॥ 37

शृङ्गाभ्यां घट्टयामास हनुमन्तं महाबलम् ।
ततो हनुमान् तेजस्वी गजं वालेन वेष्ट्य च ॥ 38

स्तम्भेन घट्टयामास चूर्णतो नागराडभूत् ।
तद्रूपमपि सन्त्यज्य भुजङ्गाकृतिकोऽभवत् ॥ 39

हनुमन्तं समावेष्ट्य ददंश कपिकुञ्जरम् ।
अथ तं हन्तुकामस्तु गारुडं मन्त्रमुच्चरन् ॥ 40

हस्ते धूलिं समादाय आकाशे विकीरत्तदा ।
तद्धूलिरेणुपटलात् गरुडालक्षराशयः ॥ 41

आगत्य तूर्णमुत्कृष्य भुजङ्गन भक्षिताभिभोः ।
भुजङ्गरूपं सन्त्यज्य महिषोऽभूत्स वेगवान् ॥ 42

शृङ्गाभ्यां त्रोटयामास खुराभ्यां भूमिमुल्लिखन् ।
उन्नदं जलदाकारं नादयन् सञ्चरत्तदा ॥ 43

तदा महिषमुद्वीक्ष्य स्थूणेन प्रजघान च ।
स्थूणप्रहाराच्चकितो व्याघ्ररूपमवाप सः ॥ 44

मुष्टिं सवर्तयामास व्याघ्ररूपं बलोद्धतम् ।
तद्रूपमपहायोग्रं पुनः स्वं रूपमश्रितः ॥ 45

रथस्थश्शुशुभे रक्षः पर्वते सिंहंराडिव ।
बाणवर्षं विमुञ्चन्तं मौसलं वर्षमेव ॥ 46

तुर्ये यामप्राथमिके तं हन्तुं कृतनिश्चयः ।
शीघ्रमुत्पाट्य वेगेन रथं पुच्छेन मर्दयत् ॥ 47

पादेन सारथिं हत्वा तलेनाश्वान्जघान च ।
सर्वायुधानपाहत्य तं गृहीत्वा विचक्षणः ॥ 48

मुष्टिभ्यां चरणाभ्यां च पोथ(पात?)यामास वानरः ।
कन्दुवच्च समुत्थाय मल्लयुद्धमथारभत् ॥ 49

अन्योन्यमालिङ्ग्य ससम्भ्रमौ तौ
सुबाहुयोक्त्रे दृढसंश्लिषन्तौ ।
वियत्स्थले मेघमिवोत्पतन्तौ
भुवस्थले नागवराविवास्ताम् ॥ 50

मुष्टिभ्यां बाहुयुद्धाभ्यासरत्निभ्यां च जघ्नतुः ।
पादाभ्यां उत्तमाङ्गाभ्यां घट्टयामासतुर्भृशम् ॥ 51

अन्योन्यमुच्छ्वसन्तौ तौ लोलयन्तौ परस्परम् ।
बाहुघातैरभिघ्नन्तौ व्याघ्राविव दुरासदौ ॥ 52

वृषभाविव नर्तन्तौ गजपोताविव स्थितौ ।
एवं वानरमुख्यस्य राक्षसस्य दुरात्मनः ॥ 53

अन्योन्यं युद्धमभवत् वृत्रवासवयोरिव ।
मार्जाराविव भक्षार्थे वितस्था ते मुहुर्मुहुः ॥ 54

सर्पगत्या चरन्तौ तौ गोमुखाकृतिका च तौ ।
मण्डलाकरणौ यत्तौ प्रहन्तौ च मुहुर्मुहुः ॥ 55

एवं नानाविधैर्मार्गैः क्षणं युद्ध्वा भृशं तदा ।
तस्मिन्नवसरे चोग्रं मारुतिः भीमविक्रमः ॥ 56

कण्ठे वालं समासज्य भूम्यामुत्पात्य चोरसा ।
सतद्वक्त्रं बहुश्मश्रूकण्ठनालादपाहरत् ॥ 57

अपहृत्य शिरोग्रीवं देहं पिण्डं चकारह ।
भूतले विससर्जाथ अपश्यत्पुनरागतम् ॥ 58

स्थिते सति ततो वेगादुत्थाय *पुनरुत्कटः ।
मुष्टिना पातयामास हनुमन्तं महोरसि ॥ 59

सतं गृहीत्वा तेजस्वी पुनर्व्यालं प्रसृज्य च ।
विदलीकृत्य च तनुं पुराद्बहिर्विसारयत् ॥ 60

तथापि शीघ्रमुत्थाय वृक्षमुत्पाट्य वानरः ।
प्रजघान शिरोदेशे राक्षसो तूर्णविक्रमः ॥ 61

तादृशं बलिनं गृह्य खण्डमुत्पाट्य बाहुना ।
लेलिशः कृतवान्यस्तु तमग्नौ प्राक्षिपत् बली ॥ 62

---

* पुन. Repit in Mss. T.M.S.S.M.L. Thanjavur.

पुनरागत्य वेगेन पृष्ठे मुष्टिं समर्पयत् ।
ततो हनुमान् उत्पत्य (त्पुलुत्य?)गृहीत्वा तं च विस्वरम् ॥ 63

निष्पीड्य सम्यक् संक्रुध्य शिलायां समघुष्य च ।
जलेन लोलनं कृत्वा भूमौ सम्प्रोक्षयत् तदा ॥ 64

तत्क्षणाद्धात्रि माहात्म्यात् पुनरुत्पत्य राक्षसः ।
हनुमन्तं महान्तं च ताडयामास मुष्टिना ॥ 65

एवं हनुमता राम शतवारं पुनः पुनः ।
सर्पाश्चिर्यकरं यत्तत् राक्षसस्य वयं कृतम् ॥ 66

पुनः पुनस्सजीवन्तं वीक्ष्य मारुतिपुङ्गवः ।
केनोपायेन हन्तुं वै राक्षसं पुरुषाधमम् ॥ 67

शक्यं राक्षसशार्दूलं कथं हन्येति चिन्तयन् ।
विचारयुक्तो हनुमान् कथं कार्यं इतःपरम् ॥ 68

मनसा चिन्तयामास राममन्त्रं षडक्षरम् ।
अथ राक्षस राजस्तु रथमारुह्य सत्वरम् ॥ 69

सर्पास्त्र सहितो धीरो हनुमन्तं रणोत्कटम् ।
सन्धाय धनुषि श्रेष्ठे विससर्ज च राक्षसः ॥ 70

अस्त्रेण चागतं वीक्ष्य रामदण्डं समाददे ।
आवाहयित्वा तद्दण्डे त्वं नामाक्षरषट्ककम् ॥ 71

न्यासयुक्तेन विधिना मन्त्रराजं षडक्षरम् ।
दण्डे न्यस्य भवन्नाम सर्पास्त्रफलभक्षणम् ॥ 72

अग्रे निधाय तद्दण्डं स्थितो दण्डधरो यथा ।
राक्षसं भक्षयामास रामदण्डं महाप्रभो ॥ 73

राक्षसो मोचयामास आग्नेयं परम हितम् ।
भक्षितं तदपि शीघ्रं तेन दण्डेन राघव ॥ 74

वारुणं मुमुचे रक्षः दण्डेन कबलीकृतम् ।
मुमोच घोरं कङ्कालं वायव्यं मथनं तथा ॥ 75

करालं विकरालं च रौद्रं याम्यं च नैर्ऋतम् ।
तान् सर्वान् ग्रासयामास ज्वलनार्कसमप्रभः ॥ 76

कल्पानलसमो भूत्वा संवर्ताग्निसमप्रभः ।
रामदण्डः प्रजज्वाल बडवाग्निरिव प्रभो ॥ 77

अथ रक्षो महत्कोपात् सौर्यास्त्रं मुमुचे तदा ।
पिनाकं त्वष्टुरस्त्रं च कालास्त्रमथ दारुणम् ॥ 78

शोषणं मोहनं चैव गान्धर्वमथ गारुडम् ।
वैद्याधरं च पर्जन्यमन्यान्यस्त्राणि मोचयत् ॥ 79

रक्षसा यानि चास्त्राणि शस्त्राणि विविधानि च ।
रामदण्डे निपत्याशु दग्धान्यासन्महामते ॥ 80

ब्रह्मास्त्रं दीपयांचक्रे राक्षसो बलदर्पितः ।
हनुमन्तं समुद्दिश्य मुमोच बलवत्तरः ॥ 81

भूकम्पमभवत्तत्र विद्दता राक्षसादिना ।
उत्पाता बहवोह्यासन् देवा बिभ्यन्मश्चर्षयः ॥ 82

तदस्त्रमागतं वीक्ष्य निश्शङ्केनान्तरात्मना ।
रामदण्डेन जग्राह सदण्डो भूषितोह्यभूत् ॥ 83

क्षणेन शान्तमभवत् ब्रह्मास्त्रं तेन भूषितम् ।
त्वं नाम सदृशो लोके कश्चिदन्योऽस्तिवागमे ॥ 84

रामनामात्परं मन्त्रं न भूतं वेद पर्वते ।
अत्रान्तरे समागत्य दुर्दण्डी मुदितानना ॥ 85

हनुमन्तं समुद्वीक्ष्य सा उवाच च राक्षसी।
रामदूत महाबाहो श्रुणु मद्वचनं हितम् ॥ 86

षडक्षरं नाम गिरेरितं नृणां-
सकृत्प्रसुङ्गादघमाशुहन्ति तम् ।
परत्र कीर्तिर्भयशोकमर्दनं
को वा न संसेव्य परं प्रयायेत् ॥ 87

इति जैमिनीभारते मारुतिमैरावणचरित्रे
सप्तदशोऽध्यायः ।

अष्टादशोऽध्यायः

अगस्त्यः –

अथोवाच च दुर्दण्डी हेतुमत्परमार्थकम् ।
एतादृशेन युद्धेन राक्षसं त्वं न जेष्यसि ॥ 1

कोटि वारं हि हन्याच्चेन्न ममार च राक्षसः ।
तस्योपायं श्रुणु ! वचस्सावधानेन चेतसा ॥ 2

अस्यां पुर्यां पूर्वभागे षट्त्रिंशद्योजनान्तरे ।
पर्वतो षट्कमस्त्यत्र उन्नतच्चतुरश्रकः ॥ 3

चतुर्योजन विस्तारः परितः परमाद्भुताः ।
तस्य पर्वमध्ये तु गुहास्सप्त च सन्ति वै ॥ 4

गुहा द्वारेण गन्तव्यं एकेनैव च सर्वतः ।
गुहायाः षट्कमुत्क्रम्य सप्तमायां गुहोदरे ॥ 5

गण्डशैलामहानेकस्तिष्ठत्यत्र न संशयः ।
तद्गण्डशैलभागेषु गुहास्सप्त च सन्ति वै ॥ 6

बिलेषु सञ्चरन्त्येते प्राणभृङ्गास्स हे कपे ।
सप्तशीर्षण्या प्राणा(हि?)भृङ्गरूपा विशन्ति वै ॥ 7

प्राणा मैरावणस्यात्र सञ्चरन्ति न संशयः ।
स्थानेह्येकस्य भृङ्गस्य न यात्यन्यो हि साम्प्रतम् ॥ 8

एकभृङ्गो हतो येन अन्यभृङ्गात्सजीवति ।
द्वौ वा त्रयो वा तुर्यो वा पञ्चषड्वा हतो यदि ॥ 9

आयान्ति सप्तमात्प्राणाः भृङ्गाणान् नात्र संशयः ।
सप्तभृङ्गे हते यस्मात् भृङ्गाज्जीवन्ति राक्षसात् ॥ 10

तस्मादेककालेन भृङ्गैस्सह समापनम् ।
कुर्या यदि सरक्षोऽथ म्रियते नात्र संशयः ॥ 11

अन्यथाप्ययुतं वर्षं युद्धन् स्यादिति मारुते ।
न म्रियेत च पापात्मा पद्मजस्य वरात् कपे ॥ 12

न्यायेन दण्ड्य क्षिप्रं मा विलम्बे मनः कृथाः ।
एवं ब्रुवन्ती दुर्दण्डीं प्रशस्य च महाकपिः ॥ 13

महान्तं राक्षसं वीक्ष्य मनोदध्रे वधं हि यत् ।
रथसारथिना सार्धं साश्च चक्रं स कूबरम् ॥ 14

भङ्क्त्वा वालेन तं गृह्य मुष्टिना मर्दयद्भृशम् ।
बन्धयित्वा च वालेन ययौ शैलतटं प्रति ॥ 15

गुहाषट्कं पातयित्वा गुहायास्सप्तमोदरे ।
गण्डशैलस्य भागे तु प्रावेशयत राक्षसम् ॥ 16

प्रेषयामास तं शैल् गण्डशैलं स भृङ्गकैः ।
एककालेन सम्मृष्टः ब्रह्मदण्डेन राक्षसः ॥ 17

प्राणभृङ्गैस्सनिष्पिष्टः मुञ्चन्नादं महारवम् ।
स ममार भृशं मृष्टश्शम्भुना भस्मको यथा ॥ 18

भैरवेण यथा दक्षः लक्ष्मणेनेन्द्रजिद्यथा ।
तथा मैरावणो दग्धो यथा मालीव विष्णुना ॥ 19

व्येपेते तु जीवे सृपस्या सुभृङ्गात्सृजन् पुष्पवृष्टिं सुपस्थानदेवाः
शिरः कम्पयोगं विधिर्विष्णुरुद्रादिशं पालकानां सुखानन्दमाप
दिशां निर्मलत्वं भुवामुन्नतत्वं द्विजानां महत्वं सदा नित्यमाप ।
दशास्य क्षयन्तं विचिन्त्यादि देवा मुदा योगभावं भजन्पेटिकायां
स्थिते सत्वयोगे कृते शत्रुकार्ये हरीनाथमन्त्रीमतीराममास्ते
पठन् राममन्त्रं सदानन्दरूपं प्रकामं परं यत्पदायोगहृत्स्थम् ॥

मैरावणमनोवृत्तं दृष्ट्वा मारुतिपुङ्गवः ।
दुर्दण्डीं प्राह हृष्टात्मा पुत्रमानीयतामिति ॥ 20

दुर्दण्डी सत्वरं गत्वा कारागृहगुहोदरे ।
निगलं मोचयित्वा तु पुत्रमादाय वेगतः ॥ 21

दर्शयन् हनुमन्तं च पादमूलं निनिर्य च ।
बध्वाञ्जलिपुटा तस्थौ आञ्जनेयस्य चान्तिके ॥ 22

नीलमेघो पाशमुक्तः स्नात्वा शुक्लाम्बरावृतः ।
नत्वा स्तुत्वा हनुमन्तं बध्वाञ्जलिपुटस्तदा ॥ 23

दण्डकैर्हेतुमद्भिश्च स्तोतुं समुपचक्रमे ॥ 24

चूर्णिका –

श्रीराघवेन्द्रपदपङ्केरुहास्वादभृङ्गाजगत्प्राणपुत्रमहादेववीर्या-धरापुत्रिकाशोकगाढान्धकारमोचनाब्जमित्रसुराराति वंशाटवीभीमदा-वाग्निरूप ! सूर्यात्मजामात्यमुख्यदशग्रीव सैन्यादि सन्दोह गोत्र दम्भोलिहस्त सुपर्वाणगन्धर्वसिद्धोरगाधीश विद्याधरास्तोत्रपात्र ! चतुर्वेदवेदाङ्गशास्त्र प्रवीण ! भवाम्भोधिझंह्मासमीर । सुहृज्जन्तु-हृदिनिर्मलाब्जकरावाससञ्चारहंस ! । अहङ्कारमैरावणक्रूरखण्डनसर्पेन्द्र दामोदरस्यन्दन । सत्कृपालोचनाम्भोजयुग्मपटुस्थूलसूक्ष्मावतार । स्फुट-

ब्धाहुशुभप्रताप महादिव्ययोगीन्द्रनिष्कल्मषध्यानमुद्रा प्राकाशोरु-तत्वस्वरूप ! सुरासौधत्किञ्चिदाभीष्ट धर्मार्थभोगापवर्ग प्रतिष्ठप्रचार ! जितारातिं षड्वर्गपश्चेन्द्रिय सर्वभूतात्मकृत् सर्वलोकाश्रयी हा हनूमन्त देवन्नमस्ते । नमस्ते।

नीलमेघं स्तुवन्तं तु समालभ्य च पाणिना ।
अङ्के संस्थाप्य च हरिः पाणिना तं समार्जयत् ॥ 25

अत्रान्तरे च मातङ्गी श्रुत्वा भर्तृवधं महत् ।
अन्तः पुराद्विनिर्गत्य प्रकिरन्मूर्धजा मुहुः ॥ 26

रुरुदे भृशं आयस्त यत्र भर्तृमृतस्थलम् ।
तत्र गत्वा विनिष्पिष्टं पतिमालिङ्ग्य विस्वरम् ॥ 27

भृशमश्रूणि मुञ्चन्ती प्रलापयितुमारभे ।
हा नाथ ममदौर्भाग्यात् रामो चौर्याधृतस्त्वया ॥ 28

किं करोमि क्व गच्छामि मद्वाचं न श्रृणोषि हि ।
रामापराधी यो लोके नास्तीति गदितं मया ॥ 29

तदेव फलितं मन्ये इदानीं किमु चिन्तये ।
बहूनि च विलापानि कुर्वन्ती भर्तुरन्तिके ॥ 30

मोहान्मूर्च्छां गता बह्वीं पुनस्संज्ञांगती सती ।
पङ्कादुत्कृष्टपत्रेव खिन्ना शोकपरायणा ॥ 31

पांसुकुण्ठितदेहाभू दाहेति च रुरोद च ।
मातङ्गी रुदतीं वीक्ष्य दुर्दण्डी रुरुदे भृशम् ॥ 32

सस्त्री बालसमायुक्तं सर्वं रोदतरैरभूत् ।
आश्वासयामास कपिर्मातङ्गीं पुनराह च ॥ 33

मारोदीः शूर भार्ये ! त्वं प्राक्तनं कर्म ईदृशम् ।
खननं कुरुभर्तारं राक्षसं शूरमानिनम् ॥ 34

खननात्परलोकं हि राक्षसानां भवेद्ध्रुवम् ।
इत्येवमुक्त्वा मातङ्गी भर्तृसंखननं कृता ॥ 35

यथा शास्त्रं तथा कृत्वा तिलाञ्जल्युदकं तथा ।
कृत्वा क्षणेन निष्पिष्टा(निर्वृत्ता ?)स्नात्वा मारुतिमाश्रिता ॥36

हनुमानथमातङ्गीमुवाच हितमुत्तमम् ।
त्वत्पुत्रीं नीलकेशीं तां नीलमेघाय चार्पय ॥ 37

नीलमेघो हि राज्यार्हो जामाता तव निश्चयः ।
दुर्दण्डी सहिता त्वं हि धर्मं सम्पाद्य यत्नतः ॥ 38

कोटिवर्षसहस्रान्ते रामलोकं गमिष्यसि ।
इत्युक्त्वा तां समामृज्य(समाधाय ?) नीलमेघमुवाच ह ॥39

नीलमेघ महाबाहो सख्यं कुरु विभीषणे ।
रामभक्तिं पुरस्कृत्य राज्यं त्वं परिपालय ॥ 40

वत्सरादेकवारं हि बलिमादाय रत्नजाम् ।
अयोध्यां रघुनाथस्य पादयोरर्पणं कुरु ॥ 41

इत्युक्त्वा मन्त्रिवर्गांस्तानुवाचवदतां वरः ।
नीलमेघं च संस्थाप्य आसने रत्नभूषिते ॥ 42

अभिषेचयितव्यं हि यूयं राक्षस नन्दनम् ।
इत्यादिश्य हनूमान् सः कालिकोष्ठं समासत ॥ 43

भद्रकालीं प्रणम्याथ स्तुत्वा तां विविधागमैः ।
देहि मे रामपेटिं तां सर्वाभीष्टप्रदे शुभे ॥ 44

इति सम्प्रार्थिता देवी हनूमन्तं महाबलम् ।
सन्तोष्य पेटिकां दत्वा आशिषं च प्रयुञ्ज्य च ॥ 45

आपृच्छ्येद्देवि विस्रब्धा सुखी तिष्ठ महेश्वरी ।
तथैव निद्रितौ देवौ हनुमान्वीक्ष्य पेटिकाम् ॥ 46

स्वसुतां नीलमेघाय सेनापत्यार्थमर्पयत् ।
हनुमता च यद्युक्तं सर्वमन्यूनतःकृतम् ॥ 47

अतिबलभुजवेगादासृपानां मथित्वा-
सकलविबुधबृन्दैस्तूयमानो हरीशः ।
नृपसुतकृतिपेटीं सम्भ्रमत्तामवाप्य-
जलजकबरमार्गान्निर्गमं सञ्चकार ॥ 48

इति जैमिनीभारते मारुतिमैरावणचरित्रे
अष्टादशोऽध्यायः ।

卐

एकोनविंशोऽध्यायः

अगस्त्यः –

रसातलादथागत्य हनुमान्मारुतात्मजः ।
लक्ष्मणेन भवन्तं च पेटिकायां च निद्रितौ ॥ 1

पूर्वमार्गपथायैव चतुर्दश्यरुणोदये ।
सूर्योदयात्पूर्वमेव उदयारुणमध्यमे ॥ 2

वानाराणां प्रवीराणां मध्ये संस्थाप्य मारुतिः ।
सुग्रीवं जाम्बवन्तं च धूम्रं केसरिणं तथा ॥ 3

विभीषणं नमस्कृत्य यथावृत्तं न्यवेदयत् ।
सुग्रीवो विपुलग्रीवो हनुमन्तं समाश्लिषत् ॥ 4

मुदा सर्वे समालिङ्ग्य आश्चर्येण समन्विताः ।
अथ सूर्योदये जाते पेटिका मायताङ्गता ॥ 5

मायामन्त्राणि सर्वाणि यथास्थानं तथागतम् ।
निद्रापटसचूर्णानि नष्टान्यासन् हि सैनिके ॥ 6

सुप्तोत्थाय सरामस्तु यथाकालं यथाविधिः ।
स्नानादीनि च कर्माणि नित्यनैमित्तिकान्यपि ॥ 7

अभेद्य कवचं बिभ्रदायुधानि च सर्वशः ।
युद्धाययत्तो हि मे धावी रामो धर्मभृतां वरः ॥ 8

रावणो रात्रिवृत्तान्तं प्रातःश्रुत्वा भयङ्गतः ।
मैरावणवधं सर्वं नीलमेघाभिषेचनम् ॥ 9

हनुमता कृतं श्रुत्वा चुकोप भृशमातुरः ।
युद्धाय निर्ययौ रक्षो परलोकाय निश्चितः ॥ 10

भवता सुचिरं युध्वा आमायां सायकैर्भृशम् ।
निर्दग्धो रावणोह्यत्र श्वेतारण्ये यथान्तकम् ॥ 11

विभीषणाभिषेकं च कृत्वा सीतां विशोध्य च ।
पुष्पकं च समारुह्य अयोध्यां प्रविवेश च ॥ 12

अभिषिच्य च आत्मानं भ्रातृभिस्सह राघवः ।

सूतः–

श्रृणुध्वं ऋषयस्सर्वे रामस्य सुमहात्मनः ।
चरितं ह्यानुपूर्व्यं तु यथाशक्ति वदाम्यहम् ॥ 13

अगस्त्येनैवमुक्तस्तु आनन्दाश्रु परिप्लुतः ।
हनुमन्तं कटाक्षेण पिबन्वचनमब्रवीत् ॥ 14

हनुमन्नञ्जनापुत्र ! प्राणदोऽस्मि ममाभि भो ।
चत्वारो भ्रातरो ह्यद्य ममार्थ फलभोगिनः ॥ 15

इत्युक्त्वा चाङ्कमाधाय हनुमन्तं नृसंसदि ।
पाणिभ्यां पस्पृशेह्यङ्गं वानरस्य महात्मनः ॥ 16

उन्मुच्य कण्ठात्सौवर्णमालादिव्यां महोज्वलाम् ।
आसज्य हनुमत्कण्ठे भोजनाय न्यमन्त्रयत् ॥ 17

अन्तःपुरं प्रविश्याथ कौसल्यायै निवेद्य च ।
हनुमन् शुभकार्यं हि सर्वत्र प्रकटीकृतम् ॥ 18

सर्वाश्चर्यसमायुक्ताः पौरजानपदाजनाः ।
हनुमत्सदृशोलोके विद्यते वा जनः कृती ॥ 19

सर्वे च मुदिता ह्यासन् सर्व सङ्घास्सचारणः ।
राममामन्त्रय ते सर्वे यथागतमरिन्दमम् ॥ 20

स्वं स्वं आश्रममासाद्य ब्रह्मानन्दमवापतुः ।
मध्याह्ने समनुप्राप्ते पाचका गुणशालिनः ॥ 21

राममासाद्य सन्नास्ते ऊचुः प्राञ्जलयस्तथा ।
शाल्यन्नं पायसापूपं व्यञ्जनानि बहूनि च ॥ 22

लेह्यशोष्याणि पेयानि कल्कचूर्णानि यानि च ।
तत्सर्वं पक्वमेवासीदिति विज्ञाप्य पाचकाः ॥ 23

रामस्य पृष्ठतो गत्वा तिष्ठन्नञ्जलिकास्तथा ।
उष्णोदककरासाद्य स्वर्णपात्राभिहस्ततः ॥ 24

विज्ञापयन् कवोष्णं च स्नानाकारास्तथैव च ।
तेषां वचनमादाय भ्रातृभिस्सह राघवः ॥ 25

हनुमन्तं च संस्नाप्य पश्चात् स्नात्वा यथाविधिः ।
शुक्लाम्बरधरस्सर्वे शुक्लमाल्यानुलेपकाः ॥ 26

रङ्गनाथं च संसेव्य रामपूर्वं दृढव्रताः ।
आसाद्य भोजनागारं वैश्वदेवादिकं तथा ॥ 27

निर्वृत्य बलिकार्याणि भोजनाय समासत ।
मध्ये स्थाप्य हनुमन्तं पार्श्वे भरतलक्ष्मणौ ॥ 28

शत्रुघ्नहनुमन्तौ च वामे संस्थाप्य राघवः ।
बाणपाततलाविष्टां रत्नपात्रीमलंकृताम् ॥ 29

भाजनं ह्याञ्जनेयस्य न्यासयित्वा स राघवः ।
जजाप परमं मन्त्रं ऊर्ध्वमूलमुखान्यपि ॥ 30

पाचकान्विविधान्शाकानेलजीरकमिश्रितान् ।
मरीचिसर्षपायुक्तान्तिन्त्रिणी मिलितान्बहून् ॥ 31

उपदंशांश्चूतफलान्नागरान् पिप्पलीनपि ।
फलान् हि चूतजम्बीरान् लिकुचान्यशिरे क्रमात् ॥ 32

पु(प:) टोली कारवल्ली च नारङ्गं शिग्रुमेव च ।
वार्ताकानिङ्गुरु क्षोश्रुनेला घुमुघुमापितान् ॥ 33

स्थापितान् पाचकैः पात्रे स्वर्णे सर्वत्र शोभिते ।
कदली पनसाम्रादि फलानि* विविधानि च ॥ 34

मरीचि व्यञ्जनान् शुभ्रान् तथा सव्यञ्जनानपि ।
प्राक्षिपत् पाचकास्तत्र सूपानि विविधानि च ॥ 35

आढकं चणकं मुद्गं राजमाषं च बर्बरम् ।
सूपवर्गान् सुपक्वांश्च भाजने निन्युरञ्जसा ॥ 36

सुखोष्णं मृदुशाल्यन्नं दिव्यान्नममृतोपयम् ।
आज्यं गवीनमाहिव्यभाज्यमप्याविकं तथा ॥ 37

पात्रे स्वर्णपुटे निन्युः प्रत्येकं च चतुर्विधम् ।
माषापूपगुळापूपैः इट्टलिकया सह ॥ 38

मोदकान् पर्पटांश्चापि ते निन्युर्व्रतपाचितान् ।
आज्यभिधारणं चक्रुः पाचकाः करकामुखात् ॥ 39

आञ्जनेयस्य पात्रे तु बह्वान्नं पर्वतोपमम् ।
पायसं शतकुंभं च सहस्रं पानकं तथा ॥ 40

---

* कन्दानि – इति मातृकायां अस्यां पाठान्तरमपि दृश्यते ।

रसानां शतसाहस्रं विस्तीर्णे पात्रभाजने ।
अपूपादीनि सर्वाणि शतभाराणि निन्यिरे ॥ 41

आज्यकुंभं शतं पूर्णं फलानि विविधानि च ।
पात्रे सम्पूर्णतां कृत्वा भोजनाय समादिशत् ॥ 42

हनुमानपि तेजस्वी दिव्यान्नैः पूर्णभाजने ।
सर्वान् संस्पृश्य हस्तेन पेशीकृत्य च हस्ततः ॥ 43

लवणादि चदध्यन्नमेकमेव प्रपेषयत् ।
निवेद्य मनसा रामं दोर्भ्यामुद्धृत्य भाजनम् ॥ 44

दिव्यान्नसहितं पात्रं तदन्नममृतोपमम् ।
ज्ञातीन्विनापि यो भुङ्क्ते पक्वान्नं ब्रह्मघातकः ॥ 45

विधिवाक्यबलात् सोपि वहन्वानरसंसदि ।
सुग्रीवस्य समीपे तु न्यस्य भाजनमादरात् ॥ 46

उवाच मारुतिर्वाक्यं दिव्यान्नममृतं हितम् ।
रामदत्तप्रसादं हि सर्वेषां सम्प्रदापय ॥ 47

इति सर्वान् समाहूय दिव्यान्नप्राशनाय वै ।
ते सर्वे वानरास्तत्र रामान्नप्राशजाय वै ॥ 48

कृतास्सर्व योधास्ते परार्थशतकोटयः ।
एकपात्रे स्थितं ह्यन्नं सर्वेषां विभजन् ददौ ॥ 49

सर्वे प्रभुञ्जिरे ह्यन्नं ददान्न(तदन्न?)मभिवर्धति (ते?)।
अक्षोहिणी सहस्राणां ह्यन्नं कण्ठगतं ह्यभूत् ॥ 50

मेरुमन्दर सङ्काशं शिष्टमन्नमभूत्तदा ।
राक्षसानां सहस्राणां कोटीनां तृप्तितां ययौ ॥ 51

ये ये वाञ्छन्ति रामान्नं ते वाञ्छन्त्यमृता ध्रुवम् ।
अन्नशिष्टं पर्वताभं बह्वाश्चर्यं सुशोभितम् ॥ 52

पर्वताकारमभवदसौ शैलमिति प्रथा ।
अन्नशैलेव सन्त्यस्तु क्षुद्धिघ्नानपि मुञ्चति ॥ 53

देवराजोपि तं दृष्ट्वा अन्नशैलं वरं ददौ ।
तदन्नमाश्रिता गङ्गा अन्नसाराभिसंश्रिता ॥ 54

कश्मलान्मेचयामास पूर्वसागरमध्यगात् ।
तदाप्रभृति काश्मीरं अन्नसाराभिसंश्रितम् ॥ 55

जनानामुपयोगाय साक्षात्स्रवाति जाह्नवी ।
तद्देशजातधान्यं तु न कीटं न विलुम्पनम् ॥ 56

तत्रस्थानमहत्वं च बीजश्रैष्ठ्यं भुवस्तथा ।
गङ्गाजलस्य माहात्म्यं जातं रामान्नसंश्रयात् ॥ 57

दिव्यान्नलाभात्कपिवीरमुख्याः-
सम्प्राश्य तृप्ताश्शतशश्च कोट्यः ।
क्षुद्व्याधिनष्टास्सु भृशं चरन्ती-
तथैव रक्षांसि चरन्ति तत्र ॥ 58

इति जैमिनीभारते मारुतिमैरावणचरित्रे
एकोनविंशोऽध्यायः ।

विंशोऽध्यायः

निवेदनाद्वानरस्य तृप्तो रामोऽभवत्तदा ।
पात्रान्नं न स्पृशेत्तत्र पूर्णोदरमपश्यत ॥ 1

किमेतदिति सर्वे ते भ्रातरो भक्तिमार्गतः ।
ज्ञात्वा भक्तिविशिष्टत्वं हनूमति महात्मनः ॥ 2

विनयेनातिभक्तास्ते रामशुश्रूषणे रताः ।
अभवन्मुदितास्सर्वे सदानन्दयुताभवम् ॥ 3

भुक्तवत्सु च सर्वेष्ठहरिराक्षसकोटिषु ।
सर्वानाहूय सत्कृत्य सर्वरत्नाम्बराणि च ॥ 4

सर्वानामन्त्र्य राजयाय सुग्रीवं च विभीषणम् ।
दत्वा विभीषणे रङ्गं सुग्रीवाय षडक्षरम् ॥ 5

आमन्त्र्य सर्वान् रामोऽपि मारुतिं स्थाप्य चान्तिके ।
मुमुदे राजराजेव स रामो भ्रातृभिर्वृत ः ॥ 6

राज्यं चकार धर्मात्मा बहुवर्षसहस्रकम् ।
एतदाख्यानमायुष्यं पुत्रपौत्राभिवर्धनम् ॥ 7

अगस्त्येनोदितं पूर्वं रामाय च महात्मने ।
युष्मदर्थं मया प्रोक्तं मैरावणकथामिमाम् ॥ 8

इति श्रुत्वा मुनिश्रेष्ठा भृशं कोतूहलाश्च ते ।
स्वं स्वमाश्रममासाद्य योगानन्दमवापतुः ॥ 9

यः श्रृणोति च माहात्मयं मैरावणविचेष्टितम् ।
हनुमच्चरितं सर्वं सर्वैःब्रह्मपदं व्रजेत् ॥ 10

अनुक्तऋषिणा पूर्वं वाल्मीकेन महात्मना ।
रहस्यं च प्रकाशं च यद्धृत्तमिति पठ्यते ॥ 11

हनुमता कृतं कार्यं राघवेणापि भावितम् ।
उक्तं जैमिना ज्ञात्वा मैरावणवधं तथा ॥ 12

औषधानयने शक्यमिति वाल्मीकी निश्चितम् ।
कृतमन्येन यत्कार्यमर्थं वानरचिन्तये ॥ 13

अभूतपूर्वं यत्कार्यं सर्वत्र परिगीयते ।
इति निश्चित्य वाल्मीकिर्नोक्तवान् ब्राह्मणोत्तमः ॥ 14

हनुमच्चरितं यावत् तावद्रामायणं विदुः ।
तदार्षेयमिदं काव्यं आधिव्याधिविदारणम् ॥ 15

यः पठेच्छ्रुणुयाद्वापि सर्वपापैः प्रमुच्यते ।
मूढो वा विधिहीनो वा पाषण्डः पतितोपि वा ॥ 16

अनाचारपरो वापि श्रवणान्मोक्षमश्नुते ।
हनुमच्चरितश्रोता रामचारित्रपाठकः ॥ 17

यस्मिन्ग्रामे वसत्यत्र तद्ग्रामो वर्धते ध्रुवम् ।
विना रामायणं ग्रामं विना भागवतं तथा ॥ 18

भारताद्वर्जितं ग्रामं दृष्टवा चान्द्रायणं चरेत् ।
रुद्रांशो हनुमान्जातः अष्टमूर्त्यंशकोनिलः ॥ 19

तस्य तस्यांशभूतस्य चरितं भुवितारकम् ।
प्रातरेवाथ मध्याह्ने रात्रौ वा यदि वा पठेत् ॥ 20

समुक्तस्सर्वपापेभ्यो विष्णुलोकं च गच्छति ।
य इदं पुण्यमाख्यानं पुरा जैमिनिना कृतम् ॥ 21

प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ।
जानकी नाथ रामाय निर्गुणाय महात्मने ॥ 22

समस्त लोकनाथाय रघुनाथाय ते नमः ॥ 23

इति जैमिनीभारते मारुतिमैरावणचरित्रे
विंशोऽध्यायः ।


श्रीरामचन्द्राय नमः । आञ्जनेयाय नमः ।

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाःपतये नमः ॥

श्रीरामःशरणं मम। हरिः ओम् ।

पिङ्गल व அற்பசி மீ 20 உ श्रीगुरुभ्यो नमः ।




தஞ்சாவூர் மகாராஜா சரபோஜியின் சரசுவதி மகால் நூலகம்
மற்றும் ஆய்வு மையம்